वर्षम् 74
अङ्कः -06
चैत्रमासः
विक्रमाब्दः 2081
युगाब्दः 5126
अप्रैल, 2024


ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | विश्वात्मा संवत्सरः | प्रो. सुरेन्द्रकुमारशर्मा | ६ |
| ३ | राजरामोभिरामः | प्रो. ताराशंकरशर्मा पाण्डेयः | ९ |
| ४ | श्रीरामगुणानुवादः | डॉ. नाथूलालसुमनः | १० |
| ५ | स्वतन्त्रतायास्तात्पर्यम् | डॉ. महेशचन्द्रशर्मा गौतमः | १४ |
| ६ | तैत्तिरीयोपनिषदि ब्रह्मविद्या | नरेन्द्रमहर्षिः | १६ |
| ७ | सांख्यशास्त्रे गुणविमर्शः | डॉ.मनीषा शर्मा | २० |
| ८ | वर्तमानशैक्षिकपरिदृश्ये ...... | पवनकुमारः | २२ |
| ९ | जयतु जयतु लोके ...... | डॉ. प्रीतिः पुजारा | २६ |
| १० | प्रियं भारतम् | पं. रमेशचन्द्रशर्मा | २७ |
| ११ | संस्कृतसमाचाराः | सम्पादकः | २८ |
| १२ | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २९ |
| १३ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १४ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३३ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9799011085**

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठम्, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठम् रेवासा )
महन्तः प्रतापपुरी
( तारातरामठम्, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर बनवारीलालगौडः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

केन्द्रीय संस्कृत विश्वविद्यालय ( शिक्षा मंत्रालय, भारत सरकार के अधीन ) के द्वारा संस्कृत पुस्तकों के प्रकाशनार्थ वित्तीय सहायता की योजना के तहत प्रदत्त वित्तीय सहायता से प्रकाशित है।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 74 अङ्कः -06
चैत्रमासः
विक्रमाब्दः 2081
युगाब्दः 5126
अप्रेल, 2024

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# जगतामाश्रय: काल:

...✍ प्रोफेसर श्रीकृष्णशर्मा

चैत्रमासस्य प्रथमो दिवसश्चैत्रशुक्ला प्रतिपत्तिथिरेव युगादि: नववर्षो मन्यते भारतवर्षे। अस्मिन्नेव दिवसे विश्वसृष्टि: सञ्जातासीद्। '**ॐ तत्सद् अद्य** श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य **ब्रह्मणोऽह्नि द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे सप्तमे वैवस्तमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथम-चरणे** जम्बूद्वीपे भरतखण्डे भारतवर्षे बौद्धावतारे आर्यावर्तैकदेशान्तर्गते (अमुक) देशे-क्षेत्रे-स्थाने, विक्रमसंवत्सरे, (अमुक) नाम्नि संवत्सरे, (अमुक) अयने-ऋतौ-मासे-पक्षे-तिथौ-वासरे ... कर्म करिष्ये / **करिष्यामि**' इत्येवं सङ्कल्पवाक्येन प्रतिदिनं भारतीयपरम्परायां कर्म समारभमाणो लोक: सप्रमाणं युगमानं बोधयति। एतादृशी प्रामाणिकी कालगणना भारतवर्षादन्यत्र विश्वस्मिन् भूतले (जगति) न कुत्रापि क्रियते,कर्तुमपि न पार्यते। अत्र सङ्कल्पवाक्ये प्रयुक्तविशिष्टशब्दानां साङ्केतिक: परिचय: प्रस्तूयते, तथा हि –

**संवत्सर:** – सम् (सम्यग्) वसन्ति (ऋतव:) अस्मिन् इति। अत्र 'सम्' उपसर्गपूर्वकाद् 'वस्' धातो: 'वसेश्च' (3.71) इत्युणादिसूत्रेण 'सरन्' प्रत्यय:। 'स: स्यार्धधातुके' (पा. 7.4.49) इति सूत्रेण 'वस्' धातुगत-सकारस्य तकार:। संवत्सरोऽब्द: (वर्ष:)। बार्हस्पत्यमानेन सम्प्रति प्रभवादि-क्षयकृदन्तेषु **षष्टि**-संख्यकाब्देषु '**काल**' नामा चान्द्रसंवत्सर: (वर्ष:) द्विपञ्चाशत्तमो रुद्रविंशतिकायाञ्च द्वादशतमो 09.04.2024 दिनाङ्कत: प्रारभ्यते। 'कल शब्दसंख्यानयो:' इति भ्वादिगणीय-धातो: णिजन्तात् कालयतीति विग्रहे पचाद्यचि काल:। अथवा चुरादिगणीय- 'कल प्रेरणे' इति धातो: णिजन्तात् पचाद्यच्। 'कल उपदेशे' इति धातो: कल्यते इति विग्रहे कर्मणि घञि 'काल' शब्दो व्युत्पन्न:। 'कृतान्तानेहसो काल:' इत्यमरोक्त्या (3.3.193) यम-समय-मृत्यु-कृष्णवर्णाश्चत्वारोऽर्था:।

संवत्सरस्य व्यवहारो बार्हस्पत्यमानेन भवति। संवत्सरस्य भेदा: षष्टिसंख्याका भवन्ति। विंशतित्रये विभजनमेषाम्। तथाहि – प्रभवादारभ्य व्ययान्त-वत्सरनामानि 'ब्रह्मविंशति' इत्युच्यते। 'सर्वजित्' इत्यारभ्य 'पराभव' इत्यन्ता वत्सरा 'विष्णुविंशति' नाम्नाऽभिधीयन्ते। 'प्लवङ्ग' इत्यारभ्य 'क्षयकृत्' पर्यन्ता वत्सरा 'रुद्रविंशति' नाम्नि परिगण्यन्ते। प्रकृते रुद्रविंशतौ '**काल**' नामा वत्सर:।

न्यायसिद्धान्त**मुक्तावल्यां** 'जन्यानां जनक: कालो जगतामाश्रयो मत:' इत्यनेन काल: परिलक्षित:। जन्यपदार्थानां निमित्तकारणं कालद्रव्यमेव। तच्चाखिलस्यापि जगत आधारस्वरूपम्। सोऽयं कालो नित्यो विभुश्च, तथाप्युपाधिभेदेन क्षण-निमेष-अहोरात्र-पक्ष-मासादिभेदेन व्यवह्रियते।

**संवत्** – सम् (सम्यग्) वयते, निरन्तरं गच्छतीत्यर्थ:। 'सम्' उपसर्गपूर्वकाद् 'वय् गतौ' धातो: 'क्विप् चे' ति (पा. 3.2.76) सूत्रेण क्विपि, 'लोपो व्योर्वलि' इति

(पा. 6.1.66)सूत्रेण यलोपे, क्विपः सर्वापहारिलोपे, 'ह्रस्वस्य पिति कृति तुक्' (पा.6.1.70) इत्यनेन तुकि 'संवत्' इति निष्पन्नः। ईशवीयाब्दतः 57 वर्षपूर्वतनो विक्रमादित्यप्रवर्तितः संवत् 2081 तमः समारभ्यतेऽधुना।

**कलियुगः** – चत्वारो युगाः भवन्ति – सत्ययुगः (1728000 मानव-वर्षात्मकः), त्रेतायुगः (1296000 वर्षात्मकः), द्वापरयुगः (864000 वर्षात्मकः) कलियुगः (432000 वर्षात्मकः)। इत्थं 4320000 मानववर्षाणाम् **एका चतुर्युगी** भवति। सत्य-त्रेता-द्वापरयुगातीतानन्तरमधुना कलियुगस्य 5126 तमो वर्षः समारभ्यते। स च कलियुगस्य प्रथमचरणः।

**मन्वन्तरम्** – ब्रह्मण एकस्मिन् दिवसे चतुर्दश मनवो भवन्ति। स्वायम्भुवः, स्वारोचिषः, औत्तमिः, तामसः, रैवतः, चाक्षुषः, एते षड् मनवो व्यपगताः। श्राद्धदेवः **सप्तमो वैवस्वतो मनुः** सम्प्रति प्रचलति। अतश्चोक्तं संकल्प वाक्ये 'सप्तमे वैवस्तमन्वन्तरे' इति। 'सावर्णिमन्वादयः सप्त (सावर्णिः, दक्षसावर्णिः, ब्रह्मसावर्णिः, धर्मसावर्णिः, रुद्रसावर्णिः, देवसावर्णिः इन्द्रसावर्णिश्च) अग्रे भवितारः। चतुर्युगाणाम् एकसप्ततितोऽपि किञ्चिदधिकम् एकं मन्वन्तरम् भवति। उपर्युक्तदिशा 6×4=24+3 = 27 युगाः व्यतीताः, अष्टाविंशतितमोऽयं युगः प्रचलति। इत्थं सप्तमश्चायं ब्रह्मा वर्तते।

**ब्रह्मणोऽहः** – चतुर्युगाणां सहस्रं ब्रह्मणोऽहन् = कल्पो वा (दिवसः) भवति। तस्य पूर्वार्धो व्यतीतः, अर्थाद् ब्रह्मण आयुषः पञ्चाशद् वर्षाणि व्यतीतानि। सम्प्रति **एकपञ्चाशत्तमवर्षस्य प्रथमो दिवसः** प्रचलति। कलियुगस्य च 5125 वर्षाणि व्यतीतानि, 5126 तमो वर्षः, वैक्रमाब्दस्य च 2081 तमश्चैत्रशुक्लप्रतिपत्तिथौ **09 अप्रेल 2024** ईशवीयदिनाङ्कतः समारभ्यते।

**कल्पः** – ब्रह्मणः शतवर्षात्मकमायुर्भवति। पञ्चाशद्वर्षान्ते 'पाद्म' नामा महाकल्प आसीद्। अधुना च तदायुषः परार्धे 'वाराह' नामा कल्पः प्रवर्तते। श्वेतवराहरूपं धृत्वा तोयान्तःस्थां महीं ज्ञात्वा तदुद्धारं कर्तुकामः प्रजापतिः ब्रह्मा तामुद्धृतवान्, अतश्चायं वाराहकल्पः। चतुर्युगीणां सहस्रम् ब्रह्मणः कल्पो भवतीत्युक्तमेव। कल्पद्वयं ब्रह्मणोऽहोरात्रम् भवतीत्यपि ज्ञेयम्।

भारतीयपरम्परायामित्थम्भूतं विलक्षणम् प्रामाणिकम् ऐतिह्यज्ञानं भारतीयानां कृते गर्वानुभूतिकरमिति वयं सौभाग्यशालिनः। भारतीया संस्कृतिरेषा सर्वैरपि प्राणपणेन संरक्षणीया। सम्प्रति समस्तेऽपि विश्वे वैज्ञानिकास्त्रशस्त्राणां यादृशी जगद्विध्वंसिनी विभीषिका स्पर्धायते सा भारतीय-सज्ज्ञान-विज्ञानेनैव संरक्षितुं शक्या। परमेश्वरं कामये विश्वशान्तिकरोऽयं कालाख्यसंवत्सरो भूयादथ च भारतवर्षस्य कृते विश्व प्रतिष्ठापको भवेदिति

**– सम्पादकः**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालये संस्कृतविभागाध्यक्षचरः,

जयपुरस्थ-जगद्गुरु-रामानन्दाचार्य- राजस्थान-संस्कृत-विश्वविद्यालये व्याकरणपीठाध्यक्षचरश्च।

दूरभाषाङ्काः 8386943655

# विश्वात्मा संवत्सरः

❑ प्रो. सुरेन्द्रकुमारशर्मा

सुविदितमेवात्र समेषां यच्चैत्रमासस्य शुक्लपक्षीया प्रतिपदा वर्षप्रतिपदेति संज्ञिता, कारणं तत्र स्पष्टमेव यदस्मिन्नेव दिने संवत्सरस्य प्रवृत्तिर्जातेति। अतः नूतनवत्सरारम्भदिनत्वेन वयमुत्सवादिकं समायोजयामः। ऐषमोऽपि चैत्रशुक्लपक्षे प्रतिपत्तिथौ सोमवासरे (०९.०४.२०२४ दिनाङ्के) नूतनवत्सरस्य एकाशीत्यधिकद्विसहस्रतमस्य (२०८१) वैक्रमाब्दस्य शुभारम्भो जायमान इति महतः प्रमोदस्यावसरोऽस्माकम्। यद्यप्येष वत्सरो विक्रमसंवत्सरत्वेनाख्यायतेऽस्माभिर्यतोहि महाराजस्य विक्रमादित्यस्य राज्यारोहणस्य २०८० वत्सराः व्यतीताः, परं केवलमेतस्मादेव नायं नूतनवर्षारम्भस्य प्रथमो दिवसः, अपितु विश्वसृष्टेः प्रथमोऽयं दिवसोऽस्ति। अतः कालविज्ञानदृशा सृष्टेः प्रथमदिवसत्वादस्ति किमप्यपूर्वं महत्त्वं दिवसस्यास्येत्यवधेयमस्माभिः। एवं न केवलं भारतीयनूतनवत्सरारम्भदिनमेतदपितु वैश्विकनूतनवत्सरारम्भदिनमिति नास्त्यत्र कश्चन विसंवादावसरः।

प्रथमं तावत् संवत्सरशब्दस्य व्युत्पत्तिरेव साधयत्यस्य सार्वभौमिकत्वम्। सम् पूर्वकात् वस् निवासे धातोः 'सम्पूर्वकाच्च (उणादि ३/२२) सूत्रेण सर् प्रत्यये 'सः स्यार्धधातुके' (७/४/४९) इति सकारस्य तकारे 'संवत्सर' शब्दो निष्पद्यते। तेन हि **'संवसन्तेऽस्मिन् भूतानीति संवत्सरः'**[१]। यत्रेमानि सर्वाणि भूतानि सन्तिष्ठन्ते आश्रितानि विनाशञ्चोपयान्ति स वै संवत्सरनामा।

अपरतश्च विविधश्रुतिवचनानि पुराणवचनान्यपि संसाधयन्ति तथ्यमेनम्। तच्च यथा –

**'ऋतं च सत्यं चाभीद्धात् तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्वः'**।[२]

श्रुतिवाक्यमिदं स्पष्टयति यत् प्रलयान्ते सर्गारम्भे विधात्रा सृष्टिसमकालमेव संवत्सरस्यापि सावयवस्य सृष्टिःकृता। यथापूर्वञ्च कल्पादौ सर्वमप्येतदकल्पयत्।

वसन्तादिशिशिरान्तानां षण्णाम् ऋतूनामेकं परिक्रमणं संवत्सरं नियमयति। **'सर्वर्तुपरिवर्त्तस्तु स्मृतः संवत्सरो बुधैः'**[३] इति।

अन्यच्चापि –

**'स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तये आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसन्तादिष्वृतुषु यथोपजोषमृतुगुणान् विदधाति।।'**

**'अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगतो द्वादशमासान् भुङ्क्ते राशिसंज्ञान् संवत्सरावयवान् मासः पक्षद्वयं दिवा नक्तं चेति सपादर्क्षद्वयमुपदिशन्ति यावता षष्ठमंशं भुञ्जीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः।।'**

**'अथ च यावतार्धेन नभोवीथ्यां प्रचरति तं कालमयनमाचक्षते।।'**

**'अथ च यावन्नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन स ह भुञ्जीत तं**

**कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मान्द्यशैघ्र्यसमगतिभिः समामनन्ति।।'**[४]

भगवतो व्यासस्य वचनैरेभिः स्पष्टं जायते यत् साक्षान्नारायण एवास्य कालविज्ञानस्य स्रष्टा। अत्र सावयवस्य च संवत्सरस्य सम्यग् विवेचनमप्यकारि भगवता व्यासेन। विवेचनेनानेन एतदपि सुस्पष्टं जातं यदेतत् समग्रमपि कालचक्रं सूर्यमन्वेति।

अन्यच्चापि –

**'संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च'**[५] **श्रुतिरियं संवत्सरस्य प्रजापतित्व-साधनपरा तस्यायनविभागं प्रदर्शयति।'**

सावयवोऽयं संवत्सर एव युगादीनां मूलाधारो यतोहि युगादीनां माननिर्धारणा संवत्सरायत्तैवास्ति। तद्यथा ब्रह्मणोऽहोरात्रमानमाह मनुः –

**दैविकानां युगानान्तु सहस्रं परिसंख्यया।**
**ब्राह्ममेकमहर्ज्ञेयं तावतीं रात्रिमेव च।।**[६]

प्रसंगवशाद् युगादिमानमत्र प्रदर्श्यते। तद्यथा- पूर्वं कृतयुगादीनां चतुर्ण्णां युगानां मानम् – 'कृतयुगमानम्-१७२८०००, त्रेतायुगमानम् १२९६०००, द्वापरयुगमानम् – ८६४०००, कलियुगमानम् ४३२००० वर्षात्मकम्। **एतन्मानं मानुषवर्षाणां ज्ञेयम्**। अथ च दिव्यैः वर्षैस्तु कृतयुगमानम् ४८००, त्रेतायुगमानम् ३६००, द्वापरमानम् २४००, कलियुगमानञ्च १२०० वर्षात्मकं ज्ञेयम्। एवञ्च दिव्यानां १२००० वर्षाणां, मानुषाणाञ्च ४३२०००० वर्षाणां चतुर्युगमानमायाति। यतो हि मनुष्याणां द्वादशमासात्मकः कालो देवानामेकमहो-रात्रं गण्यते। तत्र हि उत्तरायणं दिनं दक्षिणायनञ्च देवानां रात्रिर्भवति।

अथ दिव्यैश्चतुर्युगसहस्रैः १२०००×१०००= **१२००००००**, तथा च मानुषैश्च चतुर्युगसहस्रैः ४३२००००×१०००= **४३२०००००००** वर्षैर्ब्राह्ममेकमहर्ज्ञेयम्। एतद् ब्रह्मण एकदिनस्य मानम्। एतावदेव मानं (देवानां १२०००००० मानुषाणाञ्च ४३२०००००० वर्षाणाम्) ब्रह्मणो रात्रेरपि ज्ञेयम्। ब्रह्मणोऽयमहोरात्रमानमेव एकस्य कल्पस्य मानं भवति।[७] अत्र ब्रह्मणो दिनं भूतानां स्थितिकालः, रात्रिश्च प्रलयकालो मन्यते।

एवमत्र सम्यक्तया प्रतिपद्यते संवत्सरस्य सनातनत्वम्। संवत्सरं विना कथमेषा कालगणना सम्भवति? नान्यथेति सुस्पष्टम्।

सृष्टिसमकालिक एव संवत्सरः स्वयं ब्रह्मणैव सृष्टः। परमेतत्सर्वं स्रष्टुं ब्रह्मणा अपि तपस्तप्तं, यतोहि तेनैव तपसा ब्रह्मणः स्रष्टृत्वेन सामर्थ्यमुदेति। **'तपसा चीयते ब्रह्म'**[८] तथा च **'सोऽकामयत। एकोऽहं बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किं च'**[९], अपि च **'तस्मै स होवाच प्रजाकामो वै प्रजापतिः स तपोऽतप्यत स तपस्तप्त्वा स मिथुनमुत्पादयते। रयिं च प्राणं चेत्येतौ मे बहुधा प्रजाः करिष्यत इति।'**[१०] एताः सर्वा अपि श्रुतयः प्रतिपादनपरा दृश्यन्ते यत् तपसैव ब्रह्मणा सृष्टिकर्तृत्वसामर्थ्यमधिगतम्।

बृहदारण्यकोपनिषदपि संवत्सरस्योत्पत्तिमुप-पादयति –

**'सोऽकामयत द्वितीयो म आत्मा जायेतेति स मनसा वाचं मिथुनं समभवदशनाया मृत्युस्तद्यद्रेत आसीत् स संवत्सरोऽभवत्।'**

**न ह पुरा ततः संवत्सर आस तमेतावन्तं कालमबिभः। यावान् संवत्सरस्तमेतावतः कालस्य परस्तादसृजत।'**[११]

एतदेव व्याचक्षाणेन भगवता शंकराचार्येण प्रत्यपादि यत् **'तत्र मिथुने यद्रेत आसीत्, प्रथम शरीरिणः प्रजापतेरुत्पत्तौ कारणं बीजं**

**ज्ञानकर्मरूपम्, त्रय्यालोचनायां यद् दृष्टवानासीज्जन्मान्तर कृतम्, तद्भावभावितोऽप: सृष्ट्वा तेन रेतसा बीजेनाप्सु प्रविश्य अण्डरूपेण गर्भीभूत: स संवत्सरोऽभवत्, संवत्सरकालनिर्माता संवत्सर: प्रजापतिरभवत्। तस्मात् संवत्सरकालनिर्मातु: प्रजापते: पूर्वं संवत्सर: कालो नाम न बभूव।'**इति

कालप्रवर्तको विभाजकश्च मार्त्तण्ड:- **मार्त्तण्ड**शब्दोऽयं मृतञ्च तदण्डमिति मृतण्डं तस्यापत्यं पुमान् मार्त्तण्ड:, इति शब्दोऽपि एतदेव तथ्यं प्रमाणयति। एतेन सिध्यति यत् मृत्योर्गर्भ एव सृष्टिस्तिष्ठति। वस्तुतस्तु मृत्युर्न नाश: अपितु अवस्थान्तरप्राप्तिरेव। तथाहि गीतायाम् -

**देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।**
**तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति।।** २/१३

एवमत्र स्पष्टीभवति वेदत्रयीविहितं सृष्टिक्रमं मनसा समालोच्यैव मृत्यु: अकामयत यन्मम द्वितीयं शरीरं स्याद् येनाहं शरीरी भवेयम्। तस्यैव परिणामभूतोऽयं संवत्सर:।

**'संवत्सरो वै प्रजापति:'** प्रश्नोपनिषद् श्रुतिरपि एतदेव प्रतिपादनपरा दृश्यते।

एता: सर्वा अपि श्रुतयो या अत्र दिङ्मात्रं प्रदर्शिता: सर्वा अपि संवत्सरस्य सृष्टिसमकालोद्भावनां प्रदर्शयन्त्य: संवत्सरस्य सनातनत्वमेव न अपितु तस्य वैश्विकीं सार्वभौमिकतामपि प्रमाणयन्ति। अस्माभिस्तु सृष्ट्यब्दानामसंख्येयत्वादिदानीं विक्रमसंवत्सरत्वेनैव प्रायशस्तस्य मान्यता स्थिरीकृता। पूर्वन्तु भारतीयपञ्चाङ्गेषु सृष्ट्यब्दानामुल्लेखोऽभवत्, परमिदानीं तन्न दृश्यते। स्वर्गतै: पण्डित अनन्तशर्मभि: कालगणनाप्रसंगे एकत्र लेखे सृष्ट्यब्दानां या गणना प्रस्तुता तत्क्रमेण सा संख्या १९७२७७८४८४ आयाति। एषैवास्माकं संवत्सरस्य गणना या व्यवहर्तुं न शक्येत्यस्माभिर्विक्रमसंवत्सरत्वेनैवाद्य स्मर्यत इति।

**'सूर्य आत्मा जगतस्तथुषश्च'**[13] इति श्रुतिवाक्यप्रकाशे संवत्सरस्यास्य विश्वात्मत्वमुपपाद्य -

**य: सृज्यशक्तिमुरुधोच्छ्वसयन् स्वशक्त्या,**
**पुंसोऽभ्रमाय दिवि धावति भूतभेद:।**
**कालाख्यया गुणमयं क्रतुभिर्वितन्वं-**
**स्तस्मै बलिं हरत वत्सरपञ्चकाय।।**[14]

इति भगवतो वेदव्यासस्य वचनैर्लोकानामभ्रमाय मोहविनाशनाय संवत्सर-परिवत्सर-इडावत्सर-अनुवत्सर-वत्सर-इति (सौर-बार्हस्पत्य-सावन-चान्द्र-नाक्षत्रमासभेदेन) संवत्सरपंचकप्रवर्तकाय भगवते भास्कराय बलिमुपहृत्य सर्वलोकमङ्गलं कामयमानो विरमाम्यनल्पवचनरचनयेति शम्।।

- पूर्वनिदेशक:,
राजस्थानसंस्कृतशिक्षाविभागस्य,
सह-सम्पादकश्च भारती-पत्त्रिकाया

**सन्दर्भा:** -

१. निरुक्तम्-अध्याय ४-४-२७
२. ऋग्वेद: - मण्डल १० सूक्त १९० मन्त्र १-२-३
1. अमरकोशे कालवर्गस्य विंशतितमपद्यव्याख्यायां क्षीरस्वामिकृतायां भागुरिवचनमेतत्
४. श्रीमद्भागवत महापुराण-स्कन्ध-५, अध्याय २२-३,५,६,७
५. प्रश्नोपनिषद् - १/९
६. मनुस्मृति:
७. दैवे युगहसहस्रे द्वे ब्राह्म: (अहोरात्र:) कल्पौ तु तौ नृणाम्। (अमरकोष: -१/४/२१)
८. मुण्डकोपनिषद् प्रथममुण्डक- ८
९. तैत्तरीयोपनिषद् - वल्ली-२, अनुवाक ६
१०. प्रश्नोपनिषद् - १/४
११. बृहदारण्यकोपनिषद् - अध्याय-१, ब्राह्मण-२, मन्त्र-४
१२. श्रीमद्भागवतम् स्कन्ध - ५/७
१३. यजुर्वेद ७/४२
१४. श्रीमद्भागवतम् - स्कन्ध-३, अध्याय-१२, पद्य-१५

# राजरामोभिरामः

प्रो.ताराशंकर शर्मा पाण्डेयः

राजरामो रसेशो

स्मितदशनसुदर्शी ब्रह्मरूपावतारो
दशरथतनयोऽस्ति क्षात्रधर्मावलम्बी।
अभिनववसनोऽसौ चन्दनालेपचारू
रुचिरवदनमूर्ती राजरामो रसेशः॥1॥

कत्तोपमा केकयी

यायोध्या धरणी रसासुररमा-रामाभिरामावरा
तत्रास्ते मधुमन्थरातिमथिता कत्तोपमाकेकयी।
नोयोध्याजनरक्षकेण रघुणा पुत्रेण सा स्वासुना
तातः पावरपातितो दशरथो वाक्येन संरक्षितः॥2॥

श्रीरामसूर्योदये

कासारे मलिनेपि प्रावृषि मते पक्षे विपक्षे स्थिते
राष्ट्रं राडिव जायते सरसिजं श्रीरामसूर्योदये।
संजाता जनताद्य फुल्लहृदया नष्टान्धकारे त्वयि
लोकं लोकममोघदर्शनमहं हे राम! मोदे सदा॥3॥

नीलीरागं मनोज्ञम्

कान्ताकालालकेषु ग्रथनसुनिपुणः पुष्पमालाप्रवेणीं
फुल्लं संयोज्य हृष्टां स जनकतनयां राघवो रामचन्द्रः।
नीलीरागं मनोज्ञं कमपि कथयते साहचर्य्यप्रकाशं
श्रीताराबीजमन्त्रः समवतु सकलं रामसीमप्रबद्धः॥4॥

रामाननोद्भावनः

रामे नस्त्ययि प्राणवासवरणं लोकत्रयश्चयोतनं
श्रेष्ठस्तिष्ठति रामनामरसिकः पादाब्जकोषे रतः।
योऽन्यः सीदति रागरंगरसिको रामाननोद्भावन
इत्युल्लसभरौ नरौ स्वरुचिनाऽभीष्टं वरं प्राप्नुतः॥5॥

बीजमन्त्रः प्रसिद्धः

सीतारामस्य मध्ये विलसति परमो बीजमन्त्रः प्रसिद्धः
शान्त्यानन्दः प्रदीप्तः सरलसुहृदयक्षेमकारी विशेषः।
तारानाम्ना सुबोधः प्रतिदिनजपने मोक्षरूपेण सिद्धः
श्रीशोभः सैष पाता रमणसुखकरः शंकरश्शंकरस्स्यात्॥6॥

हे राम हे राम हे !!!!

पारीवारिकजातसौरभकृते संत्यक्तमोहः सखे!
जीवात्मभ्रमरोस्मि रामकमले गुञ्जायमानारवः।
संप्राप्तामृतरामनाममुखरो हे राम हे राम हे !!!
जीवन्मुक्तवदे भवामि भुवने रामानुसारोद्वहः॥7॥

भूतपूर्वपुरुषः

सत्तामध्यजनेषु यः पदमदोन्मत्तोद्धवत्पौरुषो
जातः सम्प्रति भूतपूर्वपुरुषः पुंलिङ्गतां स त्यजन्।
तस्माद्रामपदद्वयीं शरणगो नित्यं भजेत प्रभोः
सीतारामपदादपूर्वचरितो जायेत मोक्षास्पदम्॥8॥

ममान्तर्विरामः

मनसि मनसि नित्यं वर्तमानो जनानां
कणकणरममाणो राजरामोभिरामः।
समव समव मा मा सन्त्यजालम्ब्रहीनं
जय जय रघुनाथस्त्वं ममान्तर्विरामः॥9॥

- इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित-प्रतिनवबाणभट्ट-
पण्डितश्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजी-
वैदिकविश्वविद्यालयकुलपतिना प्रोफेसर(डॉ.)
ताराशंकरशर्मपाण्डेयेन प्रणीतं 'रामराजोभिरामः'
नवश्लोकीरामकाव्यम् सम्पूर्णम्। मो. ९८२९२७१३५१

# श्रीरामगुणानुवाद:

❑ डॉ. नाथूलालसुमन:

मर्यादा पुरुषोत्तमो भगवान् श्रीराम: विग्रहवान् धर्म:। रामकथाया: मूलाधार: वाल्मीकीय रामायणमेव अस्ति। ब्रह्मा स्वयं पुण्यां रामकथां श्लोकबद्धां कर्तुं वाल्मीकीम् आदिष्टवान्।'रामायणम्' इति नाम अपि ब्रह्मणैव कृतम्।

**कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम्।**
**यावत् स्थास्यन्ति गिरय: सरितश्च महीतले।।**
**तावद् रामायणकथा लोकेषु प्रचरिष्यति।**

बालकण्डम् ।२/३६

अत एव सम्पूर्णरामायणकाव्येऽपि प्रत्यक्षा-प्रत्यक्षरूपेण रामस्य गुणानामेव कथनं वर्तते। तथापि केषुचित् स्थलेषु तु स्पष्टरूपेण रामस्य गुणानामेव वर्णनमस्ति। सर्वप्रथमं नारदमुनिं वाल्मीकि: पृच्छति-

**कोन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।**
**एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे।**
**महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम्।।**

बालकाण्डम्।। १/२-५

तदा नारद: वदति –

**बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणा:।**
**मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्त: श्रूयतां नर:।।**
**इक्ष्वाकुवंशप्रभवो रामो नाम जनै: श्रुत:।**
**प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया।।**

बालकाण्डम्/१/७-२०

एवं सर्वप्रथमं नारदमुनी रामस्य गुणान् वदति। तदनन्तरम् अयोध्याकाण्डे रामस्य यौवराज्याभिषेक-विषयकवार्तालापत: पूर्वं वाल्मीकि: स्वयमपि रामस्य गुणानां वर्णनं करोति –

**स हि रूपोपपन्नश्च वीर्यवाननसूयक:।**
**तं समीक्ष्य तदा राजा युक्तं समुदितैर्गुणै:।**
**निश्चित्य सचिवै: सार्धं यौवराज्यममन्यत।।**

अयोध्याकाण्डम्/१/९-४२

अग्रे पौरजानपदै: सह राजानोऽपि रामस्य गुणान् कथयन्ति –

**ते तमूचुर्महात्मान: पौरजानपदै: सह।**
**बहवो नृप कल्याणगुणा: सन्ति सुतस्य ते।।**
**गुणान् गुणवतो: देव देवकल्पस्य धीमत:।**
**प्रियानानन्दनान् कृत्स्नान् प्रवक्ष्यामोऽद्य ताञ्शृणु।**

**तमेवं गुणसम्पन्नं रामं सत्यपराक्रमम्**
**लोकपालोपमं नाथमकामयत मेदिनी।।**

– अयोध्याकाण्डम् /२/२६-४८

अयोध्याकाण्ड (१८.१८) एव यदा रामो दशरथस्य संतापकारणं कैकयीं पृच्छति –

**किं निमित्तमपूर्वोऽयं विकारो मनुजाधिपे।।**

तदा कैकेयी वदति (१८.२६)

**यदि त्वभिहितं राज्ञा त्वयि तन्न विपत्स्यते।**
**ततोऽहमभिधास्यामि न ह्येष त्वयि वक्ष्यति।।**

कैकेयीवचनं श्रुत्वा व्यथितः रामः स्ववैशिष्ट्यं प्रकटयन् उवाच –

**अहं हि वचनाद् राज्ञः पतेयमपि पावके।।**
**भक्षयेयं विषं तीक्ष्णं पतेयमपि चार्णवे।**
**नियुक्तो गुरुणा पित्रा नृपेण च हितेन च।।**
**तद् ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम्।**
**करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते।।**

– अयोध्याकाण्डम् – ८/२८–३०

अरण्यकाण्डे सीताहरणकार्ये यदा रावणः मारीचस्य साहाय्यम् इच्छति तदा मारीचो व्यतिरेकमुखेन रामस्य गुणानुकीर्तनं करोति –

**न च पित्रा परित्यक्तो नामर्यादः कथंचन।**
**न लुब्धो न च दुःशीलो न च क्षत्रियपांसनः।।**३७/८
**न च धर्मगुणैर्हीनः कौसल्यानन्दवर्धनः।**
**न च तीक्ष्णो हि भूतानां सर्वभूतहिते रतः।।**३७/९
**न रामः कर्कशस्तात नाविद्वान् नाजितेन्द्रियः।**
**अनृतं न श्रुतं चैव नैव त्वं वक्तुमर्हसि।।**३७/१२
**शरार्चिषमनाधृष्यं चापखड्गेन्धनं रणे।**
**रामाग्निं सहसा दीप्तं न प्रवेष्टुं त्वमर्हसि।।**३७/१५
**धनुर्व्यादितदीप्तास्यं शरार्चिषममर्षणम्।**
**चापबाणधरं तीक्ष्णं शत्रुसेनापहारिणम्।।**३७/१६
**राज्यं सुखं च संत्यज्य जीवितं चेष्टमात्मनः।**
**नात्यासादयितुं तात रामान्तकमिहार्हसि।।**३७/१७

सुन्दरकाण्डे सीतां श्रावयितुं हनुमता श्रीरामकथाया वर्णनं कृतं, तत्रापि रामस्य गुणानुवादः अस्ति –

**तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः।**
**रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम्।।**
**तस्य सत्याभिसंधस्य वृद्धस्य प्रव्रजितो वनम्।।**

– सुन्दरकाण्डम्/३१/६–८

सुन्दरकाण्ड एव सीताप्रेरितो हनुमान् पुनरपि श्रीरामगुणानुकीर्तनं करोति –

**सीताया निश्चितं बुद्ध्वा हनूमान् मारुतात्मजः।**
**श्रोत्रानुकूलैर्वचनैस्तदा तां सम्प्रहर्षयन्।।**
**आदित्य इव तेजस्वी लोककान्तः शशी यथा।**
**राजा सर्वस्य लोकस्य देवो वैश्रवणो यथा।**
**विक्रमेणोपपन्नश्च यथा विष्णुर्महायशाः।**
**सत्यवादी मधुरवाग् देवो वाचस्पतिर्यथा।।**
**रूपवान् सुभगः श्रीमान् कंदर्प इव मूर्तिमान्।**
**स्थानक्रोधे प्रहर्ता च श्रेष्ठो लोके महारथः।।**

– सुन्दरकाण्डम्/३४/२७–३०

सीतया पृष्टेन हनुमता श्रीरामस्य शारीरिक-लक्षणानां गुणानां च वर्णनं कृतम् –

**यानि रामस्य चिह्नानि लक्ष्मणस्य च यानि वै।**
**लक्षितानि विशालाक्षि वदतः शृणु तानि मे।।**
**रामः कमलपत्राक्षः पूर्णचन्द्रनिभाननः।**
**समश्च सुविभक्ताङ्गो वर्णं श्यामं समाश्रितः।।**

सुन्दरकाण्डम्/३५/७–१६

इतोऽग्रे हनुमान् रामस्य शारीरिकलक्षणानि विशदरूपेण वर्णयति (३५/१७–२०) –

**त्रिस्थिरस्त्रिप्रलम्बश्च त्रिसमस्त्रिषु चोन्नतः।**
**षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः।।**

अत्र हनुमान् रामस्य अष्टाविंशतिगुणान् प्रकटीकरोति –

1. त्रिस्थिरः - वक्षःस्थले, मणिबन्धे, मुष्टिकायां च त्रिषु अङ्गेषु सुदृढः। 2. त्रिप्रलम्बः - त्रीणि अङ्गानि (भ्रूद्वयम्, भुजद्वयम्, शिश्नम् च) प्रलम्बानि। 3. त्रिसमः - त्रीणि अङ्गाणि (केशाग्रम्, अण्डकोषद्वयम्, जानुद्वयम्) समानि। 4. त्रिषु चोन्नतः - त्रीणि अङ्गानि (वक्षःस्थलम्, नाभिमण्डलम्, उदरम्) उन्नतानि। 5. त्रिताम्रः (नेत्रनसादीनि)। 6. त्रिषु च (कचादिषु) स्निग्धः। 7. त्रिषु (स्वरगत्यादिषु) गम्भीरः। 8. त्रिवलीमान्। 9. त्र्यवनतः (पादतलादीनि)। 10. चतुर्व्यङ्गः (ग्रीवादीनि)। 11. त्रिशीर्षवान्। 12. चतुष्कलः (पादाङ्गुष्ठयोः रेखाचतुष्टययुक्तः)। 13. चतुर्लेखः (ललाटादिषु रेखाचतुष्टययुक्तः)। 14. चतुष्किष्कुः (चतुर्हस्तोन्नतः)। 15. चतुःसमः (कपोलभुजादिषु समः) 16. चतुर्दशसमद्वन्द्वः (नेत्रकर्णोष्ठहस्तपादादीनां चतुर्दशाङ्गानां द्वयं द्वयमपि समम्)। 17. चतुर्दंष्ट्रः। 18. चतुर्गतिः (रामस्य गतिः सिंहशार्दूलवारणवृषभवत् अस्ति)। 19. महोष्ठहनुनासः। 20. पञ्चस्निग्धः (पञ्चसु अङ्गेषु केशनेत्रदन्तत्वक् पादतलेषु स्निग्धः)। 21. अष्टवंशवान् (अष्टौ अङ्गानि उत्तमलक्षणयुक्तानि)। 22. दशपद्मः (नेत्र-मुखौष्ठहस्तपादादीनि दशाङ्गानि पद्मसदृशानि)। 23. दशबृहत् (वक्षःस्थलादीनि दशाङ्गानि विशालानि)। 24. त्रिभिर्व्याप्तः (श्रीप्रतापयशोभिः व्याप्तः)। 25. द्विशुक्लवान् (मातृपितृकुलं शुद्धम्)। 26. षडुन्नतः (वक्षःस्थलनासिकाललाटादीनि षडङ्गानि उन्नतानि)। 27. नवतनुः (केशनखलोमत्वग्दृष्टिबुद्ध्यादीनि नवाङ्गानि सूक्ष्माणि)। 28. त्रिभिर्व्याप्नोति (पूर्वाह्णादिषु त्रिषु कालेषु धर्मार्थकामानामनुष्ठानं करोति)।

पूर्वोक्तेषु स्थलेषु नारदवाल्मीकिमारीच-हनुमदादिभी रामस्य येषां गुणानां वर्णनं कृतं ते गुणा तस्य शारीरिकस्तरे आचारव्यवहारादिषु च प्रकटीभवन्ति।

1. **शारीरिकगुणाः** - रामः सुशिराः, सुललाटः, सुभ्रूः, आयतताम्राक्षः, महाहनुः, ताराधिपनिभाननः, कम्बुग्रीवः, गूढजत्रुः, विपुलांसः आजानुबाहुः, महोरस्कः, पीनवक्षाः, समविभक्ताङ्गः, स्निग्धवर्णः, अरोगश्च अस्ति। एवं तस्य शरीरसौष्ठवं प्रकटीभवति।

2. **प्रजावत्सलता** - सः जीवलोकस्य रक्षिता, प्रजानां हिते रतः, चातुर्वर्ण्यस्य रक्षिता, प्रजापतिसमः, स्वजनस्य रक्षिता, सर्वलोकप्रियः, सद्भिः अभिमतः, सर्वसमः, पौरान् स्वजनवत् नित्यं कुशलं परिपृच्छति, मनुष्याणां व्यसनेषु भृशं दुःखितः भवति, सर्वेषु उत्सवेषु च पितेव परितुष्यति, न विगृह्यकथारुचिः, अस्य क्रोधः प्रसादश्च कदाचन निरर्थः न अस्ति, एषः वध्यान् नियमाद् हन्ति, अवध्येषु न कुप्यति, सर्वप्रजाकान्तैः गुणैर्विरोचते एवं प्रजापालन-संयुक्तोऽस्ति। प्रजाभिः अनुरक्तो रामोऽपि प्रजाः अनुरज्यते।

3. **शौर्यम्** - रामः देवासुरमनुष्याणां सर्वास्त्रेषु विशारदः, क्रोधे कालाग्निसदृशः, धनुर्वेदे निष्ठितः, प्रतापवान्, सत्यपराक्रमः, शत्रुनिवर्हणः, महेष्वासः, अभियाता प्रहर्ता च, सेनानयविशारदः।

**ज्ञानम्** - वेदवेदाङ्गतत्त्वज्ञः, सर्वशास्त्रार्थतत्त्वज्ञः, सर्वविद्याव्रतस्नातः, धर्मकामार्थतत्त्वज्ञः, धर्मस्य परिरक्षिता, स्मृतिमान्, प्रतिभानवान्, समाधिमान्, बुद्धिमान्, बुद्ध्या बृहस्पतिसमश्च रामः अद्वितीयोऽस्ति।

**प्रियदर्शनः** - रामः आदित्य इव तेजस्वी, सोमवत् प्रियदर्शनः, द्युतिमान्, श्रीमान्, सुविक्रमः, शुभलक्षणश्चास्ति।

**अन्यचारित्रिकगुणाः** - आर्यरामः गाम्भीर्ये समुद्र इव, क्षमया पृथिवीसमः, त्यागे धनदेन समः, सत्ये अपरः धर्म इव शुचिः, साधुः, यशस्वी, सत्यसंधः (सत्यप्रतिज्ञः), वाग्मी, विचक्षणः, मृदुपूर्वं भाषते, उच्यमानोऽपि परुषम् उत्तरं न प्रतिपद्यते, अदीनात्मा, नीतिमान्, नियतात्मा, वशी, धैर्येण हिमवान् इव, न रामोपहितेन्द्रियः, वीर्ये विष्णुना सदृशः, शचीपतेः तुल्यः, यमसमश्चास्ति। सः गान्धर्वेऽपि भुवि श्रेष्ठः।

स्वेन महता वीर्येणापि न विस्मितः रामः शीलवृद्धैर्ज्ञानवृद्धैर्वयोवृद्धैश्च सज्जनैः कथयन् आस्ते। श्रेष्ठैर्गुणैर्युक्तः सः प्रजानां बहिश्चरः प्राण इव। स्वदोष परदोषवित् रामः व्यावहारिकज्ञानवानपि अस्ति। सः आयकर्मण्युपायज्ञः संदृष्टव्ययकर्मविच्चास्ति एवम् अर्थत्रिभागविदप्यस्ति। वारणवाजिनाम् आरोहे विनयेऽपि रामः कुशलः अस्ति। देशकालवित् रामः कालवशानुगः नास्ति। अतएव नित्यं प्रसन्नात्मा भवति। दीनानुकम्पी सः उपकारेण तुष्यति अपकारं च न स्मरति। अनसूयकः रामः भूतानामवज्ञेयः नास्ति। पुरुषसारज्ञश्चासौ भूमौ अनुपमः त्रिषु लोकेषु सम्मतश्चास्ति। गुणवति रामे राज्यं प्रशासति सर्वेऽपि जनाः सर्वविधसुखिनः आसन्। कथितमपि वाल्मीकिना -

**काले वर्षति पर्जन्यः सुभिक्षं विमला दिशः।**
**हृष्टपुष्टजनाकीर्णं पुरं जनपदास्तथा।।**
**नाकाले म्रियते कश्चिन्न व्याधिः प्राणिनां तथा।**
**नानर्थो विद्यते कश्चिद् रामे राज्यं प्रशासति।।**

वा.रामा./उत्तरकाण्डम्/९९/१३-१४

रामगुणानुरञ्जिताः सर्वेऽपि ऋषयः, मन्त्रिणः, सवृद्धबालदासीकाः अन्तःपुरचराः स्त्रियः, शत्रुघ्नसहितः सान्तःपुरः भरतः, सपुत्रदाराः सर्वे महात्मानः, सपुत्रपशुबान्धवाः भृत्यवर्गाः सर्वे स्वर्लोकगमनकाले राममन्वगच्छन् -

**ततः सर्वाः प्रकृतयो हृष्टपुष्टजनावृताः।**
**गच्छन्तमनु गच्छन्ति राघवं गुणरञ्जिताः।।**

- वा.रामा. / उत्तरकाण्डम् / १०९ /१४

रामचरितमेव रामायणकाव्यस्याधारोऽस्ति, अतएव ब्रह्मणापि उक्तम् -

**आदिकाव्यमिदं राम त्वयि सर्वं प्रतिष्ठितम्।**
**न ह्यन्योऽर्हति काव्यानां यशोभाग् राघवादृते।।**

वा.रा. / उ.का. / ९८ / १८

- उपाध्यक्षः,
भारतीयसंस्कृतप्रचारसंस्थानम्, जयपुरम्

क्रमशः

# स्वतन्त्रतायास्तात्पर्यम्

❑ डॉ. महेशचन्द्रशर्मा गौतमः
(साहित्याकादेम्या पुरस्कृतः)

स्वतन्त्रताया अस्मिन् संघर्षे सिखगुरूणां बलिदानस्य प्रतिरूपाण्यन्यत्र दुर्लभ्यान्येव। धर्मस्य स्वातन्त्र्यं देशस्यैव स्वतन्त्रताया अन्यद् रूपं विद्यते। धर्मस्य स्वतन्त्रतायै नवमगुरोः श्रीगुरुतेगबहादुरमहाराजस्य बलिदानं ववृतेऽद्भुतमलौकिकमविस्मरणीयञ्च। परमपराक्रमी दशमगुरुः श्रीगुरु-गोविन्दसिंहः स्वतन्त्रताया आत्मनोऽल्पाकारस्य सैन्यबलस्य साहाय्येन यन्-मुगलशासकानां विशालाकारं सैन्यबलमनितर-साधारणेन पराक्रमेण पर्यवास्थित, यथा च स आत्मनश्चतुर एव वीरपुत्रान् युद्धस्यास्मिन् यज्ञेऽहौषीत्, दशमगुरोस्तद् बलिदानं नायं देशो कदापि विस्मर्तुं शक्ष्यति। श्रीगुरुगोविन्द-सिंहस्यास्य त्यागस्य समक्षं नतमस्तकं वर्तते समस्तं विश्वम्। महती ववृत एषा विडम्बना श्रीगुरुगोविन्दसिंहस्य यन्-मुगलशासकानां विरुद्धं युध्यमानः स तेषां पक्षं समर्थयमानानां भारतीयनृपतीनामपि विरुद्धं युद्ध आत्मनः शक्तिं व्ययितुं प्रवर्तितोऽवर्तिष्ट। महापराक्रमिणो बन्दासिंहबहादुरस्य शौर्यपूर्णं युद्धमपि स्वतन्त्रतासङ्ग्रामस्यैवाङ्गं ववृते वीरहकीकत-रायस्य बलिदानमपि च स्वातन्त्र्ययज्ञस्यैवावर्तिष्ट महार्थाऽऽहुतिः।

**टिप्पणी :** पर्यवास्थित – मुक़ाबला किया (परि अव ✓ स्था, लुङ्, प्र.पु.ए.व., 'समवप्रविभ्यः स्थः' पा.सू. १.३.२२ इत्यात्मनेपदम्).

अद्य नैके नेतारो नागरिकाश्च स्वतन्त्रतां सामान्येन गृह्णन्तः स्वतन्त्रताया महत्त्वञ्च नावगच्छन्तोऽनुपयुक्तमाचरन्ति। अननुयोक्तव्या इवाचरन्तो राजनीतिज्ञा न जानते यत् कीदृशं ववृते पारतन्त्र्यं यतोहि न तैः कदाप्यनुभूतं तत्। स्वतन्त्रे भारते लब्धजन्मानो भूयिष्ठा राजनीतिज्ञाः स्वतन्त्रताया महत्त्वमपि नानुभवन्ति। विचाराणां स्वतन्त्रताया व्यपदेशेन केषाञ्चिद् दलानां नेतारो नैके सामान्या नागरिकाश्च सामान्यजनहित-विरुद्धमाचरन्ति नैके शासकाश्च राजनीतिक-हितानि पश्यन्तो देशवासिनो मोहयितुं सामान्यजनहितविरुद्धं बहुविधाननुपयुक्तान् मार्गानङ्गीकुर्वन्ति। एवमनर्गलमाचरद्भी राजनीतिज्ञैर्न कदापि विस्मर्तव्यं यत् पूर्वमेव मुगलशासकैरेकान्तं शोषितानां भारतस्य प्रजानां शोषणमीष्टेण्डियाकम्पनीरूपेण भारतं प्रविष्टा आङ्ग्लाः कथं चक्रुः।

**टिप्पणी :** अननुयोक्तव्याः – ग़ैरज़िम्मेदार (ब.व.).

वयं ववृतिमहे भूम्याः स्वामिनः परं नावर्तिष्टास्माकं स्वामित्वं शस्यफलेऽपि च नावर्तिष्टास्माकमधिकारः। आङ्ग्लशासका

विमलचेतसां भारतीयप्रजानां शोषणार्थं जमींदारीति प्रख्यातां भूस्वामिप्रथां प्रारप्स्त। भूम्यां स्वामित्वस्याधिकारं दत्त्वा श्रमिकैः कृषकैः स्वेदं प्रवाह्योत्पादितस्य शस्यफलस्य भूयिष्ठं भागं तेभ्यो बलात् परिगृह्य शासकेभ्यः समर्पणस्याभियोज्यतां सम्पादयितुमाङ्ग्ल-शासकास्तान् भूस्वामिनो न्ययुक्षत। आत्मनः स्वार्थसाधनमात्रमवर्तिष्टाङ्ग्लशासकानां प्रयोजनम्। कृषिभूमिषु स्वामित्वस्याधिकारं प्राप्य भूस्वामिनः कृषकाणां शासकानाञ्च मध्ये शिलाफलकयोर्मध्ये गोधूम इव पिष्टा अजनिषत। निदर्शनमात्रमेतदाङ्ग्लशासकानां शोषणस्य। लघ्वाकारेऽस्मिन् निबन्धे न सर्वं वर्णयितुं शक्यते। आङ्ग्ल-शासका भारतस्य विकासप्रक्रियां कार्त्स्न्येनावरुद्धगतिं विदधुः। आङ्-ग्लानां देशस्यौद्योगिकी क्रान्तिर्भारतस्य प्रजाभ्योऽभिशापोऽभूत्। अस्माकीनं राजनीतिकं पारतन्त्र्यमस्मानार्थ्या दृशापि दृढं शृङ्खलितान् व्यधात्।

**टिप्पणी :** न्ययुक्षत - नियुक्त कर दिया (नि✓युज्, लुङ्, प्र.पु.ब.व., 'स्वराद्यन्तोपसर्गादिति वक्तव्यम्' वा ९३९ इत्यात्मनेपदम्)

नावर्तिषत तदानीमद्य सदृशानि सञ्चारसाधनानि। शोषणेन विक्रोशन्तीषु प्रजासु स्वतन्त्रताप्राप्तेः कामनया प्रवर्तिता शासकान् प्रति विद्रोहस्य भावना क्वचित् प्रत्यक्षं क्वचिदप्रत्यक्षं क्वचिद् व्यवस्थितरूपेण क्वचिच्चाव्यवस्थित-रूपेणैव सर्वत्र प्रासार्षीत्। साम्प्रतिककाले गणतन्त्रभारतस्य शासकाः प्रजानामिच्छां भावनाः सौविध्यञ्च संलक्ष्य महार्थान् विषयान् सम्प्रधारयन्ति यर्हि परतन्त्रे भारते आङ्ग्ल-शासका हिन्दूनां मुस्लिमानाञ्च धार्मिकीर्भावना अवधीरयन्तो भारतीयसैनिकानामुपयोगार्थं एन्फील्डराइफलेत्यभिधेयान्यस्त्राणि तेभ्यो ददुः। अस्य राइफलस्य कारतूसमपावरितु-मावरणस्य दन्तैरपाकरणमवर्तिष्टापरिहार्यतया-पेक्षितम्। धेनोः शूकरस्य च मांसेन निर्मितमवर्तिष्ट तदावरणम्। एषो ववृते भारतीयानां सांस्कृतिक-भावनासु प्रहारः। सांस्कृतिकचेतनायामरुन्तुदाया अस्या आहत्याः प्रतिक्रियैव कालान्तरे स्वातन्त्र्यचेतनां जनयित्वा तदर्थं युद्धस्य प्रभवोऽभूत्। जगदीशपुरस्य कुँवरसिंहस्य मार्गदर्शने आरानगरनिवासिनो वीरा योद्धारो योजनाबद्धरूपेण देशस्य स्वतन्त्रतायै शासकानां विरोधे क्रान्तिमुपाक्रंसत। द्विती-यपेशवाबाजी-रावस्य दत्तकपुत्रो नानासाहिब इमां क्रान्तिं व्यवस्थितां विधाय महार्थां भूमिकामन्वतिष्ठिपत्।

**टिप्पणी :** सम्प्रधारयन्ति - औचित्य अनौचित्य की दृष्टि से विचार करके निर्णय लेते हैं, अपावरितुम् - खोलने के लिए, हटाने के लिए, आहत्याः - चोट की, उपाक्रंसत - शुरू की (उप ✓ क्रम्, लुङ्, प्र.पु.ब.व., 'उपपराभ्याम्' पा.सू. १.३.३९ इत्यात्मनेपदम्).

# तैत्तिरीयोपनिषदि ब्रह्मविद्या

❑ नरेन्द्रमहर्षिः

'उप'-'नि'-उपसर्गद्वयपूर्वकस्य विशरण-गति-अवसादनार्थकस्य 'षद्लृ' धातोः क्विबन्तं रूपमस्ति उपनिषदिति। 'उप' उपसर्गोऽत्र समीपार्थकः, तस्मात् उप समीपम्, नि-नीचैः, षद्= उपवेशनम्। कस्य समीपमुपवेशनं किमर्थञ्च? तदोच्यते यद् गुरोः समीपं रहस्यज्ञानावाप्तये नीचैः उपवेशनम्। अर्थात् गुरोः समीपं गत्वा नीचैः (गुरोरासनात् निम्नासने) उपविश्य रहस्यमयानां पराविद्यानामध्ययनम् उपनिषदित्युच्यते। तात्पर्यमिदमस्ति यत् उपनिषत् सा विद्या अस्ति या खलु योग्येन अन्तेवासिना शिष्येण गुरोः समीपमुपविश्य प्राप्यते। यतः साऽत्यन्तगूढा भवति।

उपनिषद्भाष्यकारेण आद्यशङ्कराचार्येण उपनिषच्छब्दस्य शाब्दिकोऽर्थः 'ब्रह्मविद्या' इत्युक्तः। या ब्रह्मविद्या मुमुक्षुजनानां संसारबीजभूताम् अविद्यां विनाशयति, या विद्या तान् ब्रह्मसमीपम् प्रापयति, या च विद्या तेषां पुनर्जन्मकारकाणि कर्माणि गर्भवासादिदुःखानि शिथिलीकरोति।

उपनिषदः वैदिकवाङ्मयान्तर्गतस्य ब्रह्मयज्ञस्य प्रतिपादकाः ग्रन्थविशेषाः सन्ति। वैदिकविदुषां सम्मतौ वेदमन्त्राणां विभाजनं त्रिषु काण्डेषु कृतमस्ति। तानि च काण्डानि कर्मकाण्ड-ज्ञानकाण्ड-उपासनाकाण्डनाम्ना विभक्तानि विख्यातानि च सन्ति। त्रिष्वेषु काण्डेषु कर्मकाण्डस्य वर्णनं संहिता- ब्राह्मणग्रन्थेषु च वर्तते। परमुपनिषद्ग्रन्थाः ज्ञानकाण्डसम्बद्धाः सन्ति। कर्मज्ञानयोरुभयोः काण्डयोः साहाय्येन इष्टोपासना सम्भवति। ज्ञानस्य महत्त्वं तु सर्वविदितमेवास्ति। उक्तं हि यथा भगवता श्रीकृष्णेन गीतायाम् - **'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।'** अर्थान्मनुष्यलोकेऽस्मिन् ज्ञानसदृशं पवित्रं पावकञ्चान्यत् न किमपि साधनमस्ति।

**उपनिषदां सङ्ख्या**- उपनिषत्साहित्यं विशालतरं वर्तते। यद्यपि उपनिषदां सङ्ख्याविषये विद्वत्सु नैकमत्यं दृश्यते तथापि इतिहासग्रन्थेषु प्राप्तोल्लेखानाम् आधारेण अत्र विचारः क्रियते। भारतीया परम्परा उपनिषदां सङ्ख्या अष्टोत्तरशतं (108) मन्यते। तद्यथा -

**'सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्।**
**सकृच्छ्रवणमात्रेण सर्वाघौघनिकृन्तनम्।'**
(मुक्तिकोपनिषदि- 1/44)।

उपनिषदो हि वेदानुसारेण विनिर्मिताः सन्ति। तदनुसारेण दशोपनिषदः ऋग्वेदेन सम्बद्धाः, एकोनविंशतिः शुक्लयजुर्वेदेन सम्बद्धाः, द्वात्रिंशत् कृष्णयजुर्वेदेन सम्बद्धाः, षोडश सामवेदेन सम्बद्धाः, एकत्रिंशदथर्ववेदेन सम्बद्धाश्च सन्ति। उपनिषत्स्वेतासु कृष्णयजुर्वेदीयतैत्तिरीयशाखायाः तैत्तिरीयोपनिषद् तैत्तिरीयारण्यकस्य दशाध्यायेषु सप्तम-अष्टम-नवमखण्डानां सम्मिलितांशोऽस्ति। तैत्तिरीयोपनिषद्येवास्यां ब्रह्मविद्यास्वरूपं कीदृशमिति प्रस्तूयते।

**प्रतिपाद्यविषय:**

वेदानां तत्त्वस्य रहस्यस्य च प्रतिपादकत्वात् उपनिषद: 'वेदान्त:' 'रहस्यम्' इत्युच्यन्ते उपनिषच्छब्दस्य व्युत्पत्तिलभ्योऽर्थ: 'ब्रह्मविद्या' इति पूर्वमेवोक्तम्। तत्र कृष्णयजुर्वेदीयतैत्तिरीय-शाखायां तैत्तिरीयोपनिषद् तैत्तिरीयारण्यकस्य दशाध्यायेषु सप्तम - अष्टम - नवमखण्डानां सम्मिलितांशोऽस्ति। आरण्यकस्य संहिती उपनिषत्-शिक्षावल्ली नाम्ना, वारुणी-उपनिषद् भृगुवल्ली नाम्ना, तृतीयोपनिषच्च ब्रह्मानन्दवल्ली नाम्ना ख्याताऽस्ति। शिक्षावल्ल्यां उपासनाया: गुरुशिष्यसम्बन्धिन: शिष्टाचारस्य चैकत्र निरूपणमस्ति। भृगुवल्ल्यां ब्रह्मप्राप्तेर्मुख्यसाधनस्य वर्णनम्, भृगुवरुणयो: संवादरूपेण 'पञ्चकोश'-नाम्ना विख्यातमस्ति। ब्रह्मानन्दवल्ल्यां ब्रह्मविद्याया: निरूपणमस्ति। तेन स्पष्टमिदं भवति यत् यथा सर्वासामुपनिषदां प्रतिपाद्यविषय: 'ब्रह्मविद्या' 'आत्मदर्शनम्' वेत्यस्ति, तथा तदंगभूतत्वात् तैत्तिरीयोपनिषदोऽपि प्रतिपाद्यविषय: 'ब्रह्मविद्या' एव । स्थूलतया विषयमिमं चतुर्धा विभाजयितुं शक्यते-

1. ब्रह्मस्वरूपम्
2. ब्रह्म-आत्मनोरैक्यम्
3. ब्रह्मप्राप्ते:साधनं 'ज्ञानम्'
4. ब्रह्मप्राप्तिश्च ।

**1. ब्रह्मस्वरूपम् -**

उपनिषत्सु ब्रह्मस्वरूपस्य प्रतिपादनं विविधप्रकारेण कृतमस्ति। तैत्तिरीयोपनिषदि- **'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभि-संविशन्ति। तद्विजिज्ञा-सस्व। तद्ब्रह्मेति।'** उक्तम् ।

अस्यैव व्याख्यायां क्रमश: अन्नं ब्रह्म, प्राणा ब्रह्म, मनो ब्रह्म, विज्ञानं ब्रह्म, आनन्दो ब्रह्मेत्युक्तम्। तत्र ब्रह्मस्वरूपस्य चिन्तनम् आधिभौतिक-आधि-दैविक-आध्यात्मिकदृष्ट्या च कृतमस्ति। आभि: तिसृभि: दृष्टिभि: 'सत्' तत्त्वस्य अपरं नाम 'ब्रह्म' इति अस्ति। तदेवोक्तम्- **'ब्रह्मविदाप्नोति परम्। ....सत्यं ज्ञानमनन्तं ब्रह्म..'** इति। अन्यत्र चानन्त:, अमृतं अन्तर्यामी, परात्पर:, अक्षर:, नित्यं, प्रज्ञानं, आनन्द: इत्यादीनि च लक्षणानि प्रदत्तानि। वर्णनातीतत्वात् बृहदारण्यकोपनिषदि **'नेति नेति'** इत्यस्योपदेश: कृतोऽस्ति। अत्रैव मूर्तामूर्तरूपं, सदसद्रूपम्, सगुणनिर्गुणरूपम्, अपरब्रह्म परब्रह्मरूपम् च व्याख्यातं तैत्तिरीयोपनिषदि।

**2. ब्रह्म-आत्मनोरैक्यम् -**

उपनिषत्सु तत्त्वमीमांसाया अपर: पक्षोऽस्ति-आत्मतत्त्वविवेचनम्। संहितात आरण्यकं यावत् तद्ब्रह्म आत्मनो भिन्नमित्येतेन रूपेण प्रतिपादित-मस्ति। तदुपनिषत्सु ततो न भिन्नमित्येतेन प्रकारेण व्याख्यातमस्ति। द्वयोरप्यभिन्नत्वात् दैवाध्यात्मिक-तत्त्वयो: एकत्वाच्च आत्मैवैक: सर्वत्र न च तं विहाय कोऽप्यन्य: पदार्थ इत्युपनिषद्भिर्युक्तिभि: साधु निरणायि। आत्मैव सर्वव्यापी वर्तते। विश्वस्य सर्वेष्वपि पदार्थेषु स एव व्याप्तोऽस्ति। तस्मिन्नेव समग्रस्यापि प्रपञ्चस्य लयो भवति। ततो व्यतिरिक्तं न

किमपि। अत एव तैत्तिरीयोपनिषदाह–

**'सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किं च। तत्सृष्ट्वा तदेवानु प्राविशत्। तदनुप्रविश्य सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च। निलयनं चानिलयनं च। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत्। यदिदं किं च। तत्सत्यमित्याचक्षते। तदप्येष श्लोको भवति।'**

एतेन स्फुटं यत्संसारस्य यावन्तोऽपि सन्ति स्थूलाः सूक्ष्माः वा पदार्थाः सर्वेऽपि नात्मनो भिन्नाः। ते सर्वे आत्मत्वेनैव वेदितव्याः, नात्मनः परं किमपि प्रियतरम्।

तस्मादेव गुरुः जिज्ञासवे **'स यश्चायं पुरुषे यश्चासावादित्ये स एकः', 'तत् त्वमसि'** इत्येतदुपदिशति। शुद्धान्तःकरणसाधकः **'अहं ब्रह्मास्मि'** इत्येतं गुरूपदेशं मनसि निधाय स्वयमेवात्मनि ब्रह्मणोऽनुभूतिं कर्तुमारभते। साधकः अभ्यासवशात् शनैः शनैः **'तत्' 'त्वम्'** तथा **'अहम्' 'अयम्'** इत्यनयोर्मध्ये ऐक्यमेवानुभवति। **'एकेन विज्ञानेन सर्वं विज्ञातं भवति'** इत्येतदुपनिषद्वचोऽनुसारेण स साधकः सर्वपदार्थावबोधानन्तरं **'सर्वं खल्विदं ब्रह्म'** इत्येतत् साक्षाद्ध्वनेनानुभवति। तदेव पुनस्तैत्तिरीयोपनिषदि– **'अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति। तस्यैष एव शारीर आत्मा यः पूर्वस्य।**

**3. ब्रह्मप्राप्तेः साधनं 'ज्ञानम्'–**

उपनिषदः स्वीयस्य 'ब्रह्म'–प्राप्तिसाधन–रूपस्य 'ज्ञानस्य' महिमानं बहुविधं वर्णयन्ति। आत्मज्ञानप्राप्तये प्रोक्तेषु त्रिविधसोपानेषु श्रवण–मनन–निदिध्यासनस्य वर्णनं याज्ञवल्क्येन कृतम्। किञ्च **'ब्रह्मविदाप्नोति परम्', 'ब्रह्मविद् ब्रह्मैव भवति'** इत्याभ्यां वचनाभ्यामपि सिद्धमिदं भवति यत् ज्ञानातिरिक्तं नान्यत् किमप्युपायान्तरमस्ति मोक्षप्राप्तये। ज्ञानं हि नाशयति अज्ञानम्। तत्रेदमुच्यते यत् ज्ञानं नाम किम्? तस्मादुक्तं तैत्तिरीयोपनिषदि –

**'सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति।।'**

सत्यस्य प्राकट्यं तस्य च साक्षात्कार एव ज्ञानपदवाच्यः। ज्ञानम् एव विद्यारूपमुक्तम् यच्च दिव्यसत्यस्य मूलस्वरूपमस्ति। ज्ञानप्राप्तौ च पुनः उपासनायाः आवश्यकता भवति। ज्ञानेन उपासनया च ब्रह्मप्राप्तिःमोक्षलाभश्च सम्भवति। तस्मादुक्तं तैत्तिरीयोपनिषदि–

**'भृगुर्वै वारुणिः, वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति ... तद्ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा। अन्नं ब्रह्मेति व्यजानात्...। प्राणो ब्रह्मेति व्यजानात्...। मनो ब्रह्मेति व्यजानात्। विज्ञानं ब्रह्मेति व्यजानात्...। आनन्दो ब्रह्मेति व्यजानात्...।'** इत्थम्भृगुरुपासनया ज्ञानेन च सर्वं व्यजानात्।

**4. ब्रह्मप्राप्तिः–**

**'ओमिति ब्रह्म। ओमितीदं सर्वम्। ओमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयेत्या–**

**श्रावयन्ति। ओमिति सामानि गायन्ति। ओं शोमिति। शस्त्राणि शं सन्ति। ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति। ओमिति ब्रह्मा प्रसौति। ओमित्यग्निहोत्रमनुजानाति। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति। ब्रह्मैवोपाप्नोति।'**

ओमिति परब्रह्मणः नाम्ना ख्यातं साक्षाद् ब्रह्मैव यतोहि भगवतो नामापि भगवत्स्वरूपमेव भवति। तस्यैव ब्रह्मणः स्थूलरूपमिदं जगद्विद्यते। ब्रह्मणः शक्त्यैव देवतासु शक्तिः सञ्चरति। तस्यैव शक्तिभूतत्वेन जगतः पदार्थाः जायन्ते शक्तिमन्तः। सगुणं ब्रह्म संसारस्यास्य शास्तृ निखिलस्यापि जगतो हि जीवानां भाग्यस्य विधातृ च वर्तते। शुभकार्यकर्तृणां जीवानां तत् कल्याणसम्पादयितृ, मुक्ति- भुक्ति-प्रदातृ, अशुभकर्मकारिप्राणिनिग्रहीतृ च, तदेव सगुणं ब्रह्म ईश्वर-विराट्-हिरण्यगर्भ-संज्ञया निर्दिश्यते। अस्य विश्वस्य सर्वेऽपि प्राणिनस्तस्यैव शरीरमिति ज्ञाप्यन्ते। सगुणत्वात् तत् पादाभ्यां चलति, हस्ताभ्यां कार्यं करोति, नेत्राभ्यां पश्यति, कर्णाभ्याञ्च शृणोति। अविद्या बन्धनकारिका, विद्यया च तस्याः विनाशः। अविद्यारतो मनुष्यः कर्मक्षीणे सति स्वर्गात् च्युतो भूत्वा पुनर्भवं प्राप्नोति। पुनर्भव एव जन्म-मृत्योः चक्रं संसारो वा, तस्मात् संसार एव बन्धनहेतुः। अस्मात् बन्धनात् मुक्तिरेव परमानन्दः। अतः मोक्षः खलु आत्म-साक्षात्कार एवास्ति।

तदुक्तं तैत्तिरीयोपनिषदि –

**'स यश्चायं पुरुषे यश्चासावादित्ये स एकः। स य एवंवित्.....। हा३वु हा३वु हा३वु। अहमन्नमहमन्नमहमन्नम्। अहमन्नादो३ऽहमन्नादो३ऽहमन्नादः। अहं श्लोककृदहं श्लोककृदहं श्लोककृत्। अहमस्मि प्रथमजा ऋता३स्य। पूर्वं देवेभ्योऽमृतस्य ना३भायि। यो मा ददाति स इदेव मा३ वाः। अहमन्नमन्नमदन्तमा३द्मि। अहं विश्वं भुवनमभ्यभवा३म्। सुवर्न ज्योतीः। य एवं वेद इत्युपनिषत्।'**

इत्थमात्मज्ञानिनः'भोग्यवस्तु, भोक्ता, द्वयोरपि संयोगकारकः ईश्वरश्चाहमेवेति' ज्ञानं परमात्मनः आत्मनश्च अभेदज्ञानमित्युच्यते। तदेव श्वेताश्वतरोपनिषद्यप्याह- **'भोक्ता भोग्यं प्रेरितारञ्च मत्वा, सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्।** श्वे.उ. १-१२। इयमेवावस्था ब्रह्मप्राप्त्यवस्थारूपेण वर्णिताऽस्ति। यथा घटे विनष्टे सति घटाकाशो महाकाशश्च समौ भवतः तथैव ब्रह्मवेत्ता मृत्युकाले शरीरं विहाय परब्रह्मणा सह एकरूपतां याति। आत्मज्ञानिनः ब्रह्मस्वरूपज्ञानमेव मोक्षोऽस्ति।

– प्राध्यापकः,
राजकीयवरिष्ठोपाध्यायसंस्कृतविद्यालयः,
हमीरगढम्, भीलवाड़ा, राजस्थानम्
दूरभाषाङ्का – ८१०७७०८८४७

**सहायकग्रन्थसूची-**

1. ईशादि नौ उपनिषद्-श्रीहरिकृष्णदास-गोयनका – गीताप्रेस-गोरखपुरम्
2. संस्कृतसाहित्येतिहासः – आचार्यः लोकमणिः दहालः (चौखम्भा कृष्णदास अकादमी , वाराणसी)
3. वैदिक साहित्य एवं संस्कृति- डॉ. बलदेव उपाध्याय
4. श्रीमद्भगवदगीता- मूलमात्रम् - गीताप्रेस-गोरखपुरम्

# सांख्यशास्त्रे गुणविमर्शः

❑ डॉ.मनीषा शर्मा

संस्कृतवाङ्मये 'गुण' शब्दः अनेकेष्वर्थेषु प्रयुक्तः यथा माधुर्योजःप्रसादा इति त्रयो गुणा आलंकारिकाणां मते। आचार्यमम्मटः काव्यप्रकाशस्य अष्टमोल्लासे गुणनिरूपणं कृतवान्, यथाहि –

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः[१]।।**

अर्थात् अङ्गिनः शरीरे आत्मवत् काव्ये प्राधान्येन स्थितस्य शृङ्गारादेः ये धर्मा साक्षात्तदाश्रितास्ते गुणा इत्यर्थः। 'रसधर्मत्वे सति रसोत्कर्षकत्वम्' गुणानां लक्षणमिति फलितम्। पुनश्च यागादौ आधेयविशेषो दध्यादिः गुण इति मीमांसकाः। रूपादयश्चतुर्विंशतिर्गुणा इति वैशेषिका नैयायिकाश्च।

ज्ञानानन्दादयोऽपि गुणा इति वेदान्तिनः। अकार्पण्यास्पृहत्वादय इति धर्मज्ञाः। 'सत्त्वं रजस्तमश्चैव गुणत्रयमुदीरितम्' इत्येवं सत्त्वरजस्तमोगुणाः सांख्यदर्शनमते स्वीकृताः।

प्रकृते सांख्यमतानुसारं गुणविमर्शः प्रस्तूयते। सत्त्वं सुखरूपं, रजोगुणो दुःखरूपं तमश्च मोहरूपं भवति। यस्मिन् गुणे सति यस्माद् भयं, कस्यामपि स्थितौ विषादो नोपजायते तत् सत्त्वम् भवति।

रागद्वेषस्वरूपं दुःखानां कारणं रजो भवति। मोहस्य हेतुः तमः भवति। एषां गुणानां प्रयोजनम् इत्थं भवति। सत्त्वगुणस्य प्रयोजनम् भवति प्रकाशकरणम्। रजसश्च प्रयोजनम् भवति प्रवृत्तिकरणम्। तमसश्च प्रयोजनम् भवति अवरोधस्वरूपम् नियमनम्।

**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।**
**गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः[२]।।**

मानवस्य अवस्थात्रयम् भवति। यथा- सुषुप्तावस्था, स्वप्नावस्था, जाग्रदवस्था चेति। सुषुप्तावस्थायां सर्वेषां पदार्थानाम् आवरणसत्त्वाद् प्रधानतया तमोगुणो भवति। स्वप्नावस्थायां भ्रमरूपं ज्ञानं भवति, अतः तमोगुणस्य रजोगुणस्य च प्राधान्यं भवति। उपर्युक्तोभयावस्थायां सत्त्वगुणस्तु नाममात्रेण तिष्ठति, तत्र तस्य प्रधानता न भवति।

जाग्रदवस्थायां च रजोगुणः तमोगुणश्च उभावपि स्थितौ भवतः। चित्तस्य चंचलता, इच्छा, प्रवृत्त्यादीनि रजोगुणस्य कार्याणि जाग्रदवस्थायामपि उपलक्ष्यन्ते। अतः जाग्रदवस्थायां रजोगुणस्य स्थितिः मन्यते। जाग्रदवस्थायां सूक्ष्मपदार्थानां प्रकृतिपुरुषादीनां विप्रकृष्टपदार्थानां च विशेषरूपविषयकावरणस्य सत्त्वाद् तत्रापि तमोगुणस्य सत्तायाः कल्पनम् क्रियते। जाग्रदवस्थायां सत्त्वगुणस्य स्थितिस्तु प्राधान्येन भवितुमर्हति। इत्थं जाग्रदवस्थायां तमोगुणरजोगुणमिश्रितः सत्त्वगुणः तिष्ठतीति। जीवानां संस्कारवैचित्र्येण अदृष्टवैचित्र्येण च गुणत्रयस्य तारतम्यं नानाविधं असंख्यातं वा भवति। एषां गुणानां यानि कार्याणि तेषां गुणानाम् आधिक्येन च गुणानां न्यूनाधिक्यं कल्पनीयम्।

यस्य जनस्य निद्रातन्द्रा-आलस्यादीनि तमोगुणकार्याणि यावन्ति अधिकानि भवन्ति, तदा तमोगुणस्य तत्र आधिक्यं भवति। यदि तमोगुणकार्याणि न्यूनानि भवन्ति तदा तस्मिन् काले तमोगुणस्य न्यूनता ज्ञेया।

एवमेव चित्तस्य क्रोध-मद-हिंसा-कलहादीनां रजोगुणकार्याणां आधिक्यं भवति तदा रजोगुणस्य आधिक्यं प्रतीयते। चंचलता इत्यादि-चित्तकार्याणां न्यूनतायां सत्यां तमोगुणस्यापि न्यूनता भवति। रजोगुणस्य चित्ते यदा अभिव्यक्तिर्भवति, तदा

इच्छाया उदयो भवति। इच्छाया उदये सति चित्तस्य प्रयत्नरूपा चेष्टा उत्पद्यते। चित्तस्य चेष्टायां इन्द्रियाणां च चेष्टा भवति। इन्द्रियाणां शरीरस्य च यावन्मात्रायां चेष्टा अधिका भवति चित्तस्य कामक्रोधादयः तावन्मात्रायाम् अधिकाः भवन्ति। तेन च रजोगुणस्यापि अधिकता भवति। विशुद्धसत्त्वगुणस्य प्रधानतायां समाधेः स्थितौ अशेषतमोगुणस्य निवृत्तिः भवति। योगिजनानां तु सर्वेषां पदार्थानां ज्ञानं भवति। इत्थं सत्त्वगुणः ज्ञानरूपो बोद्धव्यः। ज्ञानस्वरूप-सत्त्वगुणस्य कार्याणि भवन्ति-अहिंसा, सत्यं, क्षमा, धैर्य, शान्तिः सुखादीनि च। एषां सत्त्वगुणकार्याणाम् आधिक्ये सति चित्ते सत्त्वगुणस्य आधिक्यं बोधनीयम्। एषां कार्याणां न्यूनताया सत्यां चित्ते सत्त्वगुणस्य न्यूनतापि ज्ञेया। तदेवं मनसि निधाय सांख्याचार्यः ईश्वरकृष्णः गुणानां लक्षणं इत्थं ब्रूते –

**प्रीत्यप्रीतिविषादात्मकाः**
**प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योऽन्याभिभवाश्रय-**
**जननमिथुनवृत्तयश्च गुणाः**[३]**।।**

अयमाशयः। गुणाः परार्थाः परोपकाराय भवन्ति। यथा- सत्त्वगुणः प्रीतिस्वभावः भवति अर्थात् तत्प्राधान्ये प्रीतिः समुद्भूता भवति, तदा दुःखानाम् अभावः अनुभूयते। यदा अप्रीतिश्च भवति तदा दुःखानुभूतिः भवति। रजोगुणस्य अप्रीतिस्वभावो मन्यते तमोगुणप्राधान्ये किंकर्त्तव्य-ताविमूढस्वरूपो विषादोऽनुभूयते। अत्र कारिकायां 'अर्थ' शब्दः सामर्थ्यवाची वर्तते। अतः सत्त्वस्य प्रकाशनं रजसश्च प्रवृत्तिः तमसश्च नियमनं सामर्थ्यम् अस्ति। एको गुणोऽपरं गुणद्वयं अभिभवति। अन्यस्य गुणद्वयस्य आश्रयं गृह्णाति। अनयोः गुणयोः जनने अपरो गुणः सहायको भवति। एको गुणः अन्यगुणाभ्यां सह मिलित्वा कार्यं करोति। सारांशोऽयमत्रोपलभ्यते यदेते सत्त्वरजस्तमोगुणाः क्रमशः प्रीत्यात्मका, अप्रीत्यात्मका, विषादात्मकाश्च सन्ति। यदा सत्त्वमुत्कटं भवति तदा रजस्तमसी अभिभूते भवतः सत्त्वगुणाधामेण। एवमन्यगुणविषयेऽपि मन्तव्यम्।

इदम् इत्थं ज्ञेयं यत् सत्त्वगुणः रजोगुणतमोगुणौ अभिभूय स्वस्वरूपानुकूलं कार्यं कर्तुम् रजोगुणतमो-गुणौ आश्रयते। ताभ्यां सह मिलित्वा कार्यं करोति। एवमेव रजोगुणतमोगुणविषयेऽपि ज्ञातव्यम्।

एषां सत्त्वादिगुणानां व्यापारः प्रयोजनवशाद् प्रदीपवद् सांख्यदर्शने अवबोधितः। सत्त्वगुणः शरीरे सरलतां विदधाति। पदार्थानां वस्तुस्वरूपप्रकाशने सामर्थ्यं प्रददाति। सत्त्वगुणः अभीप्सितो भवति। शरीरे रजोगुणे सति रागद्वेषौ उत्पद्येते। तमोगुणे सति अज्ञानस्य आधिक्यं भवति। गुरुता प्रतीयते। एषां गुणानां विविधस्वभावानां परस्परं सामञ्जस्यं भवति। यथा प्रदीपे तैलम्, वर्तिका, अग्निश्च तिष्ठन्ति। एते परस्परं विरुद्धपदार्थाः सन्ति। किन्तु सांसारिक-पदार्थान् प्रकाशयितुं सामंजस्यपूर्वकं मिलित्वैव कार्यं कुर्वन्ति। एवमेव सत्त्वरजस्तमोगुणा अपि पुरुषस्य पुरुषस्य (आत्मनः) भोगापवर्गस्वरूपमुद्देश्यं पूरयितुं मिलित्वैव कार्यं कुर्वन्ति। तदुक्तम् –

**अन्योऽन्यमिथुनाः सर्वे, सर्वे सर्वत्र गामिनः।**
**रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः।।**
**तमसश्चापि मिथुनं ते सत्त्वरजसी उभे।**
**उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते।**
**नैषामादिः सम्प्रयोगो, वियोगो वोपलभ्यते**[४]**।।**

– सहायक आचार्यः, संस्कृतविभाग,
जयनारायणव्यासविश्वविद्यालय, जोधपुरम्

सन्दर्भः –

१. काव्यप्रकाश – अष्टम उल्लास – ६६
२. सांख्यकारिका – कारिका १३
३. सांख्यकारिका – कारिका १२
४. देवीभागवतपुराणम् – ३/५०

# वर्तमानशैक्षिकपरिदृश्ये महाभारतकालीनशिक्षायाः उपादेयता

❑ पवनकुमारः

महाभारतं विश्वेतिहासस्य साहित्यस्य चाद्वितीयं महाकाव्यमस्ति। विशालकायग्रंथोऽयं शतसाहस्त्री संहितयाऽपि सम्बोध्यते। अत्र कृष्णद्वैपायनमहर्षिवेदव्यासेन मानवजीवनस्य प्रकृतेश्च स्थूल-सूक्ष्मभेदयोः सर्वं रहस्यं सरल-भाषायाम् उपनिबद्धं कृतमस्ति। यद्यपि महाभारते कौरव - पांडवयोः परिवारिकघटनायाः राजपरम्परायाश्च विवरणं प्रासंगिकघटनाभिः आख्यानैश्च सामाजिक-सौहार्दसंवर्धनाय प्रस्तुतं कृतमस्ति तथापि तत्र संपूर्णवेदविज्ञानस्य अर्थशास्त्रस्य धर्मशास्त्रस्य कामशास्त्रस्य च ज्ञानं प्रस्तुतमस्ति। प्राचीनभारतीयविद्यायाः ज्ञानस्य चाद्भुतोऽद्वितीयो विश्वकोशोऽस्ति। अत्र लिखितानि सर्वाणि तथ्यानि तत्त्वानि च मानवजीवनस्य जटिलतः जटिलसमस्यानां निराकरणं कुर्वन्ति।

पुरुषार्थचतुष्टयस्य विस्तृतं वर्णनं संस्काराणां च सुमहत् प्रतिपादनमत्र विहितमस्ति। ज्ञानगर्भित्वा-च्चायमितिहासो धर्मशास्त्ररूपेण अपि प्रख्यातोऽस्ति। अस्मिन् विषये उक्तमस्ति -

**अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत्।**
**कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना।।**[१]

अत्रास्मिन् ग्रंथे विविधानां विद्यानामुल्लेखेन सह शैक्षिकम्-प्रशैक्षिकं शास्त्र-सम्मतं समाजसम्मतञ्च समाविष्टमस्ति। महाभारते धर्मशिक्षा, समाजशिक्षा, राजनीतिः, अर्थशास्त्रं, कृषिः, वेद-विज्ञानशिक्षा, तकनीकी-औद्योगिकी इत्यादयः सर्वे शिक्षणविषयाः समाविष्टाः सन्ति। अत एवोक्तम् - **'यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत्क्वचित्'** -इति।

श्रीकृष्णस्य गुरुभावःअर्जुनस्य शिष्यभावश्च विश्वप्रसिद्धः अस्ति।

श्रीमद्भगवद्गीतायाःगूढरहस्यपरकज्ञानं विज्ञानं चाद्य सर्वत्र प्रतिष्ठितं व्यावहारिकं च अस्ति। पुरुषार्थः एव करणीयः फलं तु ईश्वराधीनमस्ति इति उक्त्वा अनया शिक्षया संसारे कर्मणः महत्त्वं प्रतिपादितं। कर्मभिश्च मनुष्यःसुखमाप्नोति न कदापि दुःखमनुभवति -

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन**
**मा कर्मफलहेतुर्भू र्मा ते सङ्गोऽस्त्वकर्मणि।।**[२]

सर्वदृष्ट्या समाजस्य हितार्थाय सुव्यवस्था-करणाय परिवारिक-सौहार्द संवर्धनाय चात्र विभिन्नाःप्रासंगिकाः कथाःउपाख्यानानि च समायोजितानि कृतानि सन्ति। अत्रास्मिन् महाकाव्ये लोके प्रचलिताःविविधाःविद्याः यथाप्रसंगम् अत्र समागताः सन्ति। अत ग्रंथस्य गम्भीराताया: विषये कथितमस्ति यत् -

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।**[३]

अर्थात् महाभारते यत्किमपि वर्णितमस्ति तत् सर्वत्र विद्यते प्राप्यते वा, यत् इह नैव वर्णितमस्ति तत् संसारे कुत्रापि नैव प्राप्यते। मानवजीवनस्य उद्देश्यं पुरुषार्थचतुष्टयस्य प्राप्ति:परिपालनकरणं चास्ति। तत्र धर्माचरणं कृत्वा जीवने पवित्रता आनेया, तत: धनोपार्जनाय धर्मपथे चलित्वा एव अर्थस्य उपार्जनम् करणीयम् इति शिक्षा अत्र प्रतिपादिता अस्ति। एवं यदा जीवने धर्माचरणेन अर्थोपार्जनं कृत्वा कामनानां पूर्ति:भवति तत:मोक्षस्तु स्वयमेव भविष्यति, साधनशुद्ध्या साध्यसिद्धे:।

कामनानां विषये श्रीमद्भगवत्गीतायां भगवता बहूक्तमस्ति। काम: एव दु:खानां कारणं भवति। अस्य प्रत्यक्षमुदाहरणं महाभारते शरशय्यायां शयान: पितामहभीष्म: अस्ति। संपूर्ण-शरीरं बाणाघातै: निपीडितमस्ति रक्तप्रवाहश्च भवति तीक्ष्णबाणा: शरीरं निपीडयंति तथापि इच्छामृत्युप्राप्तवरदान: भीष्म; युद्धदर्शनस्य कामनया प्राणान् नैव त्यजति। अत: सिध्यति यत् पुरुषार्थानां समाजे संस्थापनाय मनुष्यमात्रं सुखीकरणाय चास्य ग्रन्थस्य प्रयोजनमस्ति।

**भरतानां महज्जन्म तस्माद् भारतमुच्यते।**
**महत्त्वाद् भारवत्त्वाच्च महाभारतमुच्यते।।**[४]

सत्यस्य विजयो भवति, धर्माच्च धरेयं सुस्थिराऽस्ति, सज्जनानां सद्व्यवहारेण सद्गति: दुर्जनानां दुर्गतिश्चेति निश्चितमिति महाभारतस्य सार:।

आध्यात्मिकपक्ष: अस्य बहुमहत्त्वमाधत्ते। ब्रह्मज्ञानं तु अत्र पदे पदे प्रस्फुटितमस्ति। **अंगुष्ठमात्रप्रमाण ईश्वर:** इत्युक्त्वा ब्रह्मण: सर्वव्यापकता प्रतिपादितास्ति।

महाभारते सामाजिकपरिस्थिते: अध्ययन-करणानन्तरं ज्ञायते यत् वर्तमानसमयस्य सामाजिकपरिस्थिति: तात्कालिकी परिस्थितिश्च नैवाधिकभिन्ना आसीत्। दैनिकचर्यायां यद्यपि व्यापकपरिवर्तनं दृश्यते। अद्य यत्र भौतिकतावशात् विद्युद्यन्त्रै:सर्वाणि कार्याणि सम्पादितानि सन्ति; भोजनाद्यपि परम्परागता: नैव सन्ति; तत्रैव पूर्वं सामाजिका:स्वस्य हस्तै: कार्यं कुर्वन्ति स्म: येन ते स्वस्था: पुष्टा: बलवीर्यसम्पन्नाश्च भवन्ति स्म।

दैनिकव्यवहारस्तु प्राय: समान एवास्ति;दुष्टस्य मित्रता प्राक्कालेऽपि स्वीकार्या नासीत् अद्यापि च समाजे नाङ्गीक्रियते। सत्यस्य सम्मान: पूर्वमपि आसीत्; सत्यवादी 'धर्मराज:' इत्युपाधिना युधिष्ठिर: सम्बोध्यते, अद्यापि च सत्यस्य प्रतिष्ठा वर्तते। छल-कपटकरणस्य परिणाम: पूर्वमपि अनिष्टकारी आसीत् अद्यापि आत्मविनाशकारी चास्ति। भ्रातृणां परिजनानां च व्यवहार:, स्त्रीस्वभाव:, चारित्रिकमुत्थानं, चारित्रिक-दौर्बल्यं चापि नैवाधिकभिन्नं वर्तते, न्यूनाधिकमवश्यमस्ति।

महाभारतकालीनशिक्षाया: स्वरूपं सर्वथा भिन्नमासीत्। तत्र पठन-पाठने गुरु-शिष्यप्रणाली भवति स्म। आश्रमेषु गुरव: विविधविषयान्मौखिक-रूपेण पाठयंति स्म। छात्राश्च शृण्वन्ति स्म। श्रुत्वैव अर्थग्रहणं स्मरणं कुर्वन्ति स्म। लेखनस्य सर्वथा

अभावः एव आसीत्। छात्राः शास्त्रोक्तविधिना विविधविद्यानामध्ययनं, अभ्यासं, प्रदर्शनं, व्यवहारे प्रयोगञ्च कुर्वन्ति स्म। अनेन एव मौखिकरूपेण पठित्वा ते बालकाः महान्त आचार्याः, वैज्ञानिकाः, कुशलचिकित्सकाः, वक्तारः, योद्धारः, धर्मोपदेशाकाश्च भवन्ति स्म। चतुर्वर्णानां पालनं चतुराश्रमाणां पालनं तेषां कृते शिक्षाग्रहणकरणाय परमावश्यकमासीत्। अद्य शिक्षायाः व्यावसायिक-करणे संलग्राःसन्ति। सर्वगुणोपेता नीतियुता शिक्षा तु व्यपगता इव प्रतिभाति अधुना। सर्वत्र अर्थार्जनस्य प्रतिस्पर्धायां शिक्षणसंस्थानानि अध्यापकाश्च आधुनिकचाकचक्ये नैतिकतापूर्णशिक्षायाः कृते नैवोत्सहिनःः प्रतिभान्ति इदानीम्।

आश्रमाणां सुरम्यवातावरणस्य स्थाने उत्तुंगोत्तुंगाः सुवर्णमयाः विद्यालयाः आगच्छन्ति अद्य। यत्र आश्रमशिक्षाप्रणाल्यां ज्ञान-गौरवस्य वार्ता भवति स्म, तत्रैव अद्य दिनपर्यन्तं धनार्जनस्य शिक्षाशुल्काहरणस्य सुविशद्वार्ता प्रचलति विद्यालयेषु महाविद्यालयेषु च। पठन-पाठनस्य नास्ति तादृशी चिंता यादृशी छात्रस्य रक्तशोषणकर्त्री शुल्काहरणस्य चिंता संपूर्णविद्यालयपरिसरे मुख्यद्वारतः गर्भगृहपर्यन्तं व्यापृता दृश्यते, एवं प्रतीयते यत् चतुर्दशविद्यानां चतुर्दशपाणिनीयसूत्राणां चतुर्दशलोकानां च अन्तर्भावः केवलं एकस्यामेव शुल्काहरणनामचातुरीशिक्षायां समाहारो भूत्वाऽखिलब्रह्माण्डज्ञानागारः केवलम् एकस्मिन् एव शब्दे विलीयते, स च महान्शब्दः 'फीस'इति। प्राथमिकशिक्षातः उच्च-उच्चतरशिक्षापर्यन्तं इयमेव हीनदशा अद्य भौतिकयुगे। केवलं धनस्य आगमः भवति, शैक्षिकमूल्यानां मानवमूल्यानां तु सर्वथा लोपः एव गच्छन् अस्ति। एवं 'वर्तमाने व्यावसायिकी शिक्षा'इति सिद्धा भवति।

शिक्षणविधयः अपि अद्य यंत्रसाध्याः सन्ति। पारायणम्, श्रवण-मननं, एकनिष्ठध्यानम्, अनुकरणम्, गुरुकुलपद्धतिः, प्राचीनशिक्षणविधयः अद्य नगण्यप्रायाः सन्ति। महाभारतकालीनशिक्षायाः अद्य महती उपादेयता वर्तते। महाभारते विहितसंस्कराणां महत्त्वं सार्वभौमिकं सार्वकालिकं चास्ति -

**पिताहमस्य जगतो माता धाता पितामहः।**
**वेद्यं पवित्रं ऊँकारं ऋक् साम यजुरेव च**[1]।।

अध्यात्मं तु महाभारतस्य मूलम् अस्ति। एवं ग्रंथोऽयं न केवलं संस्कृतसाहित्यस्य अमूल्यज्ञाननिधिः अस्ति अपितु मानवजीवनस्य अनुशासनग्रंथोऽयं सर्वदा मानवमात्रं शिक्षयति। धर्म-ज्ञान-वैराग्य-भक्ति-नीति-सदाचार-सृष्टिप्रपंच-लौकिकपारलौकिकमहत्वं च अत्र समाहितमस्ति। अतः एव महाभारतं '**पंचमवेद**'संज्ञयापि सम्बोध्यते जनैः। आध्यात्मिकविषयाणां विशदं वर्णनं विवेचनं चात्र कृतमस्ति। एवं महाभारतं भारतीयज्ञानस्य विश्वकोषःवर्तते।

कवि-महाकवि-लेखकानामाधारग्रंथोऽयं सदैव समाजे धर्मसंस्थापनार्थं सत्यं च महिममंडितं

करणाय प्रतिबद्धोऽस्ति। विधर्मिणां विनाशकरणाय जनान् सावचेतसः करोति -

**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय संभवामि युगे युगे[६]।।**

वर्तमाने मनुष्यमात्राय शान्त्याः सौहार्दस्य च महती आवश्यकता अस्ति, अतः शांतिपर्वणि, अनुशासनपर्वणि, उद्योगपर्वणि च जीवने शान्त्यै सुखाय च बहूपदेशाः कृतास्सन्ति। तत्र विहिता शिक्षा आधुनिकवैज्ञानिकयुगे अपि उद्देश्यपूर्णास्ति। सामाजिक-कुरीतयः मानसिकविकारान् च परित्यजेत् आत्मनः कल्याणाय इति संदेशःपदे पदे दृष्टिपथम् आयाति।

यथोक्तम् -

**शोकः क्रोधश्च लोभश्च कामो मानः परासुता।**
**ईर्ष्या मोहो विधित्सा च कृपासूया जुगुप्सता।।**
**द्वादशैते महादोषाः मनुष्यप्राणनाशनाः[७]।**

महाभारते ब्रह्मज्ञानस्य कृता व्याख्या जगत्प्रसिद्धा अस्ति। ब्रह्मज्ञानमेव जीवस्य मोक्षाय कल्याणाय च भवति। सूक्ष्मशरीरम् अनश्वरमस्ति, सूक्ष्म-शरीरस्य देहान्तरप्राप्त्यनन्तरं शोको नैव कर्तव्यः।

**अस्मिँल्लोके वै जयन्तीह कामान् -**
**ब्राह्मीं स्थितिं ह्यनुतितिक्षमाणाः।**
**आत्मानं निर्हरंतीह देहा-**
**न्मुञ्जादिषीकामिव सत्त्वसंस्थाः[८]।।**

वर्तमानसमयस्य विद्यार्थिनां कृते महाभारतकालीन गुरु-शिष्ययोः सम्बन्धः विचारणीयोऽस्ति। यतोहि वर्तमाने भौतिकतावशात् छात्रेषु नैतिकतायाः प्रायः अभाव एव दृश्यते। छात्राः गुरुजनान् नैवाधिकं मन्यन्ते। अतः तेषां कृते तात्कालिकगुरु-शिष्ययोः व्यवहार आदर्शभूतोऽनुकरणीयः -

**गुरुं शिष्यो नित्यमभिवादयीत,**
**स्वाध्यायमिच्छेच्छुचिरप्रमत्तः।**
**मानं न कुर्यान्नदधीत रोष-**
**मेष प्रथमो ब्रह्मचर्यस्य पादः[९]।।**

गुरोः सदैव उपकारः एव विधातव्यः शिष्यैः, गुरुं प्रति श्रद्धायाः भावः स्थापनीयः, दीक्षाकाले गुरो ऋणमुक्तये यथासामर्थ्यम् ईप्सितवस्तु गुरुदक्षिणारूपं गुरवे दद्यात्। एवं महाभारतकालीनशिक्षायाः उपादेयता सम्प्रत्यपि सर्वेषु क्षेत्रेषु महत्त्वमादधाति।

- शोधच्छात्रः,
जगद्गुरुरामानंदाचार्य-राजस्थान-संस्कृत-
विश्वविद्यालयः, मदाऊ, जयपुरम् -३०२०२६

**संदर्भः**

१. महाभारतम्, आदिपर्व, २/३८३
२. गीता, २/४७
३. महाभारतम्, आदिपर्व, ६२/५३
४. स्वर्गारोहण-पर्व, ५.६५
५. गीता, ९.१७
६. गीता, ४.८
७. महाभारतम्, उद्योगपर्व, ४५.१
८. तदेव, ४४/७
९. तदेव, ४४/१०

# जयतु जयतु लोके काव्यगोष्ठी कवीनाम्

❑ डॉ. प्रीतिः पुजारा

प्रणयरससुधां या पाययन्ती सहर्षं
हरति निखिलतापं मानुषाणां नताङ्गी।
कविकरकमलाभ्यां लालिता पालितेयं
जयतु जयतु लोके काव्यगोष्ठी कवीनाम्।।१।।

नटति हसति श्यामा मेनका प्रेमरूपा
नवरसमधुपानैस्तोषयन्ती कवीन्द्रान्।
विकल-विवश-चित्ते मर्षते चन्दनं या
जयतु जयतु लोके काव्यगोष्ठी कवीनाम्।।२।।

रसभरतरुणीयं कर्षति प्रेमगीतै-
र्नयति सुखसमुद्रे हेलया काव्यकर्तॄन्।
सुरसदनसुरेन्द्राः काङ्क्षिणो यत्र वस्तुम्
जयतु जयतु लोके काव्यगोष्ठी कवीनाम्।।३।।

कवनकुशलपुत्रैः शारदासुन्दरीणां
कृतनवनवशृंगारैः प्रियाऽलंकृतेयम्।
विविधफलददेव्याः शारदाया धरा या
जयतु जयतु लोके काव्यगोष्ठी कवीनाम्।।४।।

कविपरिषदि नित्यं काव्यमत्तैः सुकण्ठैः
अभिनवकविवृन्दैर्गीयते कृष्णचन्द्रः।
'ठुमक-ठुमक' राधा वेणुनादैर्नटन्ती
जयतु जयतु लोके काव्यगोष्ठी कवीनाम्।।५।।

- सहायकाचार्यः, संस्कृतविभागः
डी.सी.एम. कला-वाणिज्यमहाविद्यालयः
वीरमगाम-अहमदाबाद-गुजरात

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 150/-, पंचवर्षीय शुल्क 700/-, आजीवन सदस्यता ( 15 वर्ष ) शुल्क 2100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या - **21391019124****98**
**IFS Code - CNRB0002139**

# प्रियं भारतम्

❑ पं. रमेशचन्द्रशर्मा

परब्रह्मरूपं परेशं च रामम्,
चिरं शान्तिदं जानकीशं नमामि।
नतोऽहं पुरीं रामभूमिं सदैवम्,
प्रियं भारतं चापि नव्यामयोध्याम्।।१३६

प्रियं सर्वलोकैकनाथं च रामम्,
विशालं विशुद्धं विराटस्वरूपम्।
प्रसन्नाननं सुन्दरं रूपशोभम्,
नतोऽहं नतोऽहं प्रभुं राघवेन्द्रम्।।१३७

विलोलं प्रियं लोचनं चारुरूपम्,
धनुर्बाणहस्तं तुणीरं च दिव्यम्।
ललाटे सदा चर्चितं चन्दनं च,
विशाले च वक्षःस्थले मौक्तिमालम्।।१३८

प्रबुद्धं प्रियेशं पदं शाश्वतं हि,
चलत्कुण्डलं स्निग्धवर्णं सुरेशम्।
सलीलं सुखं पीतवस्त्रं च रामम्,
सदा जानकीशं नतोऽहं नतोऽहम्।।१३९

अयोध्यापुरी भाति दिव्या नवीना,
विभातीह तत्रैव राजीवरामः।
प्रवीराय रामाय राजेश्वराय,
नमो राजराजाय सर्वप्रियाय।।१४०

अजं रामभद्रं कृतज्ञं गुणेशम्,
हरिं विश्ववंद्यं विभुं रामचन्द्रम्।
प्रजानां प्रियं रामराजं रमेशम्,
नमामीह लोकाधिपं लोकपालम्।।१४१

स्वधर्मेण पूर्णं दृढं सत्यसंधम्,
तमेवं हि रामं पुनः कौशलेशम्।
मुनीनां प्रियं राघवं वेदरूपम्,
भजेऽहं हि सीतापतिं दीनबन्धु।।१४२

यशस्वी समः पीनवक्षा विशालः,
रमानाथ रामो प्रजापालकश्च।
ततो रक्षिता जीवलोकस्य चार्यः,
स्वधर्मस्य दीनस्य भूयः सतां च।।१४३

चिदानन्दरूपं च राजीवनेत्रम्,
रणे कर्कशं विक्रमं धर्मतत्त्वम्।
कृपालुं कुमारं च कारुण्यरूपम्,
स्वरूपाभिरामं च रामं प्रपद्ये।।१४४

अयोध्या च पुनः जाता, नव्या भव्या सुदर्शना।
रामजन्मस्थली पुण्या, स्वर्गादपि गरीयसी।।१४५

मकरेऽर्केऽपराह्ने च, द्वादश्यां चन्द्रवासरे।
जनवरी हि मासेऽस्मिन्, द्वाविंशतितमे दिने।।१४६

वर्तमाने चतुर्विंशत्यधिकद्विसहस्रके।
ईश्वीयाब्दे तथा जाता, राममूर्तिः प्रतिष्ठिता।।१४७

जगत्यामुत्सवाः हर्षाः, जाताः भूयः शुभे दिने।
रामनामजयोद्घोषैः, राष्ट्रमाह्लादितं पुनः।।१४८

शताब्दपञ्चकं प्रायः, व्यतीतं भारते भुवि।
ततो कालोऽधुनाऽयातः, श्रीरामस्य च मन्दिरम्।।१४९

साकारोभूदयं स्वप्नः, शोभनं राममन्दिरम्।
वयं धन्याः जनाः धन्या, ये च भारतवासिनः।।१५०

रामलल्लं प्रियं बालं, गर्भगृहे विराजितम्।
स्वर्णसिंहासनस्थं तम्, वन्देऽहं भरताग्रजम्।।१५१

सीतारामपुरी जाता, सीताराममयी यथा।
कौशल्यानन्दनः रामः, पुनः तत्र विराजितः।।१५२

शुभ लग्ने च संजाता, मन्त्रोच्चरणपूर्वकम्।
रामलल्लाप्रतिष्ठा च, भारते राममन्दिरे।।१५३

यदा मोदी तदा सर्वम्, सम्भवं भारतेभुवि।
राजते भारते वर्षे, शेभनं राममन्दिरम्।।१५४

दृश्याश्चापि ह्यदृश्या च, भारते दिव्यशक्तयः।
योगी भागवतो भक्तः, नरेन्द्रो देशरक्षकः।।१५५

धर्माचार्यास्तथा सर्वे, सन्तो भक्ताः यथा स्थिताः।
मन्दिरे च प्रिये देशे, पुनीते प्रियभारते।।१५६

प्रधानसेवको मन्त्री, राष्ट्रभक्तो विचक्षणः।
प्रतिष्ठामकरोत् भव्यां, सन्निधौ योगिनां ततः।।१५७

- पूर्वप्राध्यापकः, मो. ८९५२००८३६३

संस्कृतसमाचाराः

# विलक्षणप्रतिभासम्पन्नो वृषवर्धनः

18.03.24 त 21.03.24 पर्यन्तम् अयोध्यानगर्यां केन्द्रीय-संस्कृत-विश्वविद्यालय, नवदिल्ली द्वारा सम्पन्नासु अखिलभारतीयशास्त्रीय-स्पर्धासु **'गीता-कण्ठपाठ'** प्रतियोगितायां महेशनगर-जयपुरस्थः षड्वर्षीयो **वृषवर्धनशर्मा** द्वितीयं स्थानमवाप्य रजतपदकमवाप्नोत्। इतः पूर्वं केन्द्रीयसंस्कृतविश्वविद्यालय, जयपुरपरिसरद्वारायोजितायां राज्यस्तरीय-प्रतियोगितायां **प्रथमं** स्थानमयमलभत। मातापितरौ चास्य श्रीमती मोनी शर्मा श्रीदीपकशर्माणौ, अपि च पितामही मधुशर्मा पितामहश्च श्री सुवालालशर्माऽस्य प्रत्यक्षं वैलक्षण्यमनुभवन्तः आत्मनः सौभाग्यशालिनो मन्वते। आंग्लमाध्यमेन द्वितीयकक्षायामधीयानोऽयं शिशुः एकादशप्रान्तीयभाषासु प्रावीण्यं भजतेतराम्। **अन्तरराष्ट्रियमैथेमैटिक्स ओलम्पियाड, सामान्य-ज्ञानओलम्पियाड प्रतियोगितयोरयं स्वर्णपदकमवाप्नोत्।** श्रीमद्भगवद्गीता-रुद्राष्टाध्यायी-विष्णुसहस्रनाम-ललितासहस्रनाम-शिवताण्डव-स्तोत्रप्रभृतिशताधिकस्तोत्राणि चास्य कण्ठगतानि सन्ति। श्रृंगेरी-शारदापीठ-शंकराचार्य-जगद्गुरु विधुशेखर-भारतीमहोदयानां सान्निध्ये सम्पूर्णां श्रीमद्भगवद्गीतामश्रावयद्, अतस्तैरप्यनुगृहीतः सम्मानितो जातः।

वस्तुतोऽस्य पितरौ समाजस्याभिवन्द्यौ। **'प्रतिदिनमुत्पादयतः कति न जडान् दम्पती तनयान्। तावेव जगति जनकौ जनकौ यौ प्राज्ञपुत्रस्ये**'ति विद्वच्छिरोमणेस्तथ्योक्तेः।

– सम्पादकः



कुलपतीनां वरखेडीमहोदयानामाशिषं गृह्णन् पितृभ्यांसह वृषवर्धनः

# अखिलभारतीय-रूपकमहोत्सवः

केन्द्रीयसंस्कृतविश्वविद्यालयस्य विंशः अखिलभारतीयरूपकमहोत्सवः मार्चमासस्य षष्ठदिनाङ्कतः नवमदिनाङ्कपर्यन्तं जयपुरपरिसरे समायोजितः। महोत्सवेऽस्मिन् केरल-कर्नाटक-जम्मूकाश्मीर-उडीसा-अगरतला-लखनऊ-भोपाल-हिमाचलप्रदेश-उत्तराखण्ड-गुजरात-पश्चिमबङ्ग-नवदेहली प्रभृतिराज्येभ्यः क्षेत्रीयरूपक-महोत्सवे चिताः गणाः प्रतियोगितायां भागं गृहीतवन्तः। अस्मिन् अखिलभारतीयरूपकमहोत्सवे दशरूपकेषु अन्यतमानां हास्याधारितप्रहसनसंज्ञक-रूपकाणां प्रस्तुतयः कुशीलवैः छात्रैः कृताः। एतदतिरिक्तं संस्कृतपुस्तकप्रदर्शनी-संस्कृतभारती-विज्ञानप्रदर्शनी-हस्तरञ्जनी-स्वदर्शिनीस्थल-चिकित्सापरामर्श-सांस्कृतिकसन्ध्यादिकार्यक्रमा-णामायोजनपि अभवत्। अखिलभारतीय-रूपकमहोत्सवे मञ्चितेषु रूपकेषु प्रथमपुरस्कारः जयपुरपरिसरेण, द्वितीयपुरस्कारः श्रृङ्गेरीस्थ श्रीराजीवगान्धिपरिसरेण, तृतीयपुरस्कारः संयुक्तरूपेण श्रीसदाशिवपरिसरः पुरी, श्रीभगवानदास-आदर्शमहाविद्यालयः, हरिद्वारेण च प्राप्तः। संस्कृतस्य प्रचारप्रसाराय विश्वविद्यालयस्य कुलपतीनां **श्रीनिवासवरखेडी**-महोदयानां मार्गदर्शने पद्मश्रीः **अनुपमाहोसकेरे** महोदयया संस्कृतभाषायां पुत्तलिकाप्रदर्शनम्, राजस्थानस्य शौर्यं प्रदर्शयितुं 'बलिदानम्'(कथा पन्ना धाय री) इत्यस्य मञ्चनं च अभवत्।

– सम्पादकः

पुस्तकसमीक्षा

# प्रेमभक्तः कविः जयदेवः ( उपन्यासः )

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

सुपरिचिता एव स्युः पाठका आचार्य विजयरत्न-कीर्तिसूरीश्वरस्य कृतित्वेन। आचार्यवर्यकृतः सुप्रसिद्धस्य फ्रांसदेशीयोपन्यासकारस्य विक्टह्यूगो इत्यस्य 'ले मिजराकल (ले. मीजराह्ल) नाम्न उपन्यासस्य मूलशङ्कर मो. भट्टकृतं गुर्जरभाषानुवाद-माधारीकृत्य संस्कृतेऽनूदित उपन्यासः **'चिरदुःखितः'** इति शीर्षकवहः समीक्षितोऽभूत् भारत्याम्। श्रीमता सूरीश्वरेण सम्प्रति विश्वविदितस्य 'गीतगोविन्द' प्रणेतुर्जयदेवस्य जीवनमाधुर्त्य गुर्जरभाषायां सुप्रथितेन लेखकेन जयभिक्खुनाम्ना विलिखितस्य जीवनवृत्तरूपस्योपन्यासस्य **'प्रेमभक्तः कविः जयदेवः'** इतिशीर्षकवहो विशिष्टः संस्कृतानुवादः प्रणीतोऽस्ति यः सपद्येव बेङ्गलूरुस्थया संस्कृतभारतीसंस्थया प्रकाशित इति ज्ञात्वा प्रसीदेयुः पाठकाः।

पद्मावतीचरणचारणचक्रवर्तिनः श्रीकृष्णराधि-कयोरमरप्रेम्णः प्रकटीकरणं कुर्वाणममरं काव्यं 'गीतगोविन्दं' विरचितवतः कविवर्यस्य जयदेवस्य जीवनमाधुर्त्य 23 परिच्छेदेषु प्रणीतोऽयमुपन्यासः प्रणेतुः सर्जनकौशलं प्रकटयति। स्वकीयां मौलिकीं प्रतिभां विस्तारकौशलेन प्रकटयति कथाकारः। राज्ञो लक्ष्मणसेनस्य वृत्तम्, गौडेश्वरस्य साम्राज्यकथा, बख्तियार खिलजी इत्यस्य वर्णनम्, पद्मावती-जयदेवयोरमरः प्रेमा इत्यादिकं कथानकस्य स्वरूपं सुरुचिरतया प्रस्तौति। पर्यन्ते जयदेवः पद्मावती च गङ्गाप्रवाहे स्वात्मानं विसृज्यामरत्वं प्राप्तवन्तौ इति हृदयावर्जकं वर्णनं कथानकस्यास्य विशिष्टमवदानं प्रकटयति। जयदेवः पद्मावतीं कथयति- 'विवाहोचितानि परिधानानि परिधेयानि। प्रयाणक्षणः अयम् अपि मिलनक्षणवत् मङ्गलरूपः करणीयः।' जयदेवो वंशीवादनं प्रारभते। गङ्गातरङ्गे द्वावपि सहैवामरत्वं स्वीकुरुतः। आचार्यवर्यस्य विजयरत्न-कीर्तिसूरीश्वरस्यानुवादः प्राञ्जलशैल्या सुरुचिरायां भाषायां कथानकं प्रस्तुवन् पाठकान् सुतरां प्रसादयेदिति स्पष्टमेव।

बेङ्गलूरुस्थायाः संस्कृतभारत्याः श्लाघ्या संस्कृतसेवा संस्कृतजगति सुप्रथिताऽस्ति यया प्रकाशनमस्योपन्यासस्य कृतमस्ति। अभिनन्दन-वचोभिः सभाजयामः प्रेमभक्तस्य कवेर्जयदेवस्य जीवनममरीकुर्वाणमुपन्यासं संस्कृतेऽनूदितवन्तं विद्वद्वरमाचार्यविजयरत्नकीर्तिसूरीश्वरं ग्रन्थस्य प्रकाशनं कृतवतीं संस्थां संस्कृतभारतीं च।

**प्रेमभक्तः कविः जयदेवः** (गुर्जरभाषोपन्यासकारः **जयभिक्खुः**, संस्कृतानुवादकः **आचार्यविजयरत्नकीर्तिसूरिः**, **प्रकाशिका** संस्कृतभारती, अक्षरम्, 8 उपमार्ग, 2 घट्टः, गिरिनगरम्, बेङ्गलूरु, पृ.सं. 220, मूल्यम् 110/-)

नारी-स्तम्भः

# पाताले नाकपृष्ठे वा वसेयं सीतया सह

❑ डॉ. राजेश्वरी भट्टः

भारतीयसंस्कृतिसंरक्षकेण आदिकविना महर्षिवाल्मीकिना लोकमङ्गलदृष्ट्या विरचितं आदिकाव्यं रामायणं वस्तुतः संस्कृतेर्मूलतत्त्वानां विशदं विवेचनं प्रस्तौति। अस्मिन् प्रसंगेऽत्र वर्णितः सीतारामयोः सर्वास्ववस्थासु रम्यो दाम्पत्यभावो लोके युगयुगेभ्योऽनुकरणीयो वरणीयश्च वर्तते। विवाहानन्तरं अयोध्यानगर्यां राजप्रासादे सुखसम्भारेषु निवसन्तौ दम्पती सीतारामौ परस्परं अन्योन्यस्य पूरकौ दृश्येते। श्रद्धाविश्वासयोर्भूमौ विहरतोः तयोः प्रीतिरनुदिनं वर्धमाना जाता। कथितञ्च -

प्रिया तु सीता रामस्य दाराः पितृकृपा इति।
गुणाद्रूपगुणाच्चापि प्रीतिर्भूयोऽभिवर्धते।
तस्याश्च भर्त्ता द्विगुणं हृदये परिवर्तते।।

वा.रा. 1/77/26.27

देवाङ्गनासमा रूपवती मूर्तिमती लक्ष्मीरिव श्रेयसी पतिप्राणा सीता सहचरस्य रामस्य हृदयस्थितं भावमकथितमपि ज्ञात्वा भर्तुः मनोऽनुसारिणमाचरितवती। दम्पत्योर्मध्ये कदापि मनागपि मतान्तरं नादृश्यत। कथितञ्च -

अन्तर्गतमपि व्यक्तमाख्याति हृदयं हृदा।
तस्य भूयो विशेषेण मैथिली जनकात्मजा
देवताभिः समा रूपे सीता श्रीरिव रूपिणी

वा.रा. 1/77/28

अयोध्याया राजप्रासादे परस्परमनुकूलौ सुखेन विहरन्तौ सीतारामौ स्वधर्ममनुष्ठितवन्तौ सर्वेषां प्रीतिमवर्द्धयताम्। दिव्यरूपगुणकर्मभिः सम्पन्नौ सीतारामौ दशरथस्य भवने धन्यतरौ जातौ। गुणानां खनिं सीतां प्राप्य श्रीरामः श्रिया सह विष्णुरिव सुशोभितो जातः।

कथितञ्च :-

तया स राजर्षिसुतोऽभिकामया
समेयिवानुत्तमराजकन्यया।
अतीव रामः शुशुभे मुदान्वितो
विभुः श्रिया विष्णुरिवामरेश्वरः।।

वा.रा. 1/77/29

श्रद्धाविश्वासयोः हृत्सूत्रेण बद्धं सीतारामयोः दाम्पत्यजीवनं, भवतु सुखं दुःखं वा, अनुदिनं दृढतरं दृश्यते। विगतरात्रिपर्यन्तं राजप्रासादे भर्त्रा रामेण सह सुखशय्यामधिशयाना सीता प्रातरुत्थाय विमातुः कैकेय्या आदेशेन परिजनैः निषेध्यमानाऽपि रामेण भूयोभूयो वार्यमाणाऽपि 'अनुष्ठास्यति रामस्य ससीता प्रकृतमासनम्' इति। गुरुवशिष्ठस्य भव्यं प्रस्तावमस्वीकुर्वन्ती पतिप्राणा दृढसंकल्पा मनागपि विचलिता न जाता घोरं वनं गन्तुं उद्यता च जाता।

कथितञ्च -

अहं गमिष्यामि वनं सुदुर्गमम् मृगायुतं वानरवारणैश्च।
वने निवत्स्यामि यथा पितुर्गृहे तवैव पादावुपगृह्य सम्मता।।

- वा.रा. 2/27/22

सीताया दृढाग्रहेण गृहीतो विवशोऽनन्यगतिको रामः सीतया लक्ष्मणेन च सार्धं घोरं वनं प्रस्थितो वने वनवासोचितानि महत्कष्टानि महार्हशय्याशयनोचितायाः प्राणवल्लभायाः सीतायाः कृते असहनीयानि न भवेयुः अनया चिन्तया ग्रस्तः पतिः रामः सीतां सहजां कर्त्तुं लक्ष्मणं ब्रूते -

जागर्तव्यमतितन्द्राभ्यामद्य प्रभृति रात्रिषु।
योगक्षेमौ हि सीताया वर्तते लक्ष्मणावयोः।।

वाः राः 2/53/3

वने यदा रावणेन सीताया अपहरणं कृतं तदा

रामं प्रति सीताया दृढविश्वासो भारतीयनारीणां चरित्रस्य उदात्तस्वरूपं व्यनक्ति। सीताया मते इन्द्रस्य भार्यायाः शच्या अपहरणकर्त्ता कदाचिद् लोके जीवितो भवेत्। किन्तु रामस्य सहचरीं मां सीतामपहृत्य लोके कोऽपि प्राणधारणे क्षमो नाऽस्ति। कथितञ्च -

अपहृत्य शचीं भार्यां शक्यमिन्द्रस्य जीवितुम्।
न हि रामस्य भार्यां मामानीय स्वस्तिमान् भवेत्।।

वा.रा. 3/48/23

यथा सीता विषमं प्राप्यापि सहचरं रामं प्रति पूर्णतः विश्वस्ताऽऽसीत् तथैव रामोऽपि सीतां विना लक्ष्मणम् एकाकिनं दृष्ट्वा वने असंयत उद्विग्नश्च जातः। किमधिकं वने इतस्ततः सीतां मृगयन् प्राणांस्त्यक्तुमुद्यतोऽभवत्। लताभ्यो वृक्षादिभ्यश्च सीतायाः गन्तव्यविषये प्रमत्त इव विविधान्प्रश्नान-पृच्छत्। कथितञ्च -

यदि जीवति वैदेही गमिष्याम्याश्रमं पुनः।
संवृत्ता यदि वृत्ता सा प्राणांस्त्यक्ष्यामि लक्ष्मण।।

वा.रा. 3/58/9

अत्रैव प्रसङ्गे वनं नेतुं प्रार्थयन्त्याः सीताया वचनान्यप्यवधेयानि यत्रोक्तम् -

एवं वर्षसहस्राणि शतं वापि त्वया सह।
व्यतिक्रमं न वत्स्यामि स्वर्गोऽपि हि न मे मतः।।

वा.रा. 2/27/20

अपि च -

स्वर्गेऽपि च विना वासो भविता यदि राघव।
त्वया विना नरव्याघ्र नाहं तदपि रोचये।।

वा.रा. 2/27/21

वाल्मीकिरामायणे वर्णितः सीतारामयोः आदर्शदात्पत्यसम्बन्धः युगयुगेभ्यः परिवारस्य अभ्युदयस्य निःश्रेयसकृते प्रेरणीयो वर्तते। अद्य पश्चिमीयेन प्रभञ्जनेन संस्कृतिमूलानि प्रकम्पितानि जातानि दम्पत्योर्मध्ये श्रद्धाविश्वासयोर्बन्धनं अनुदिनं शिथिलायते। सर्षपं पर्वताकारं कुर्वन्तौ पतिपत्न्यौ कलहायमानौ स्वतन्त्ररूपेण जीवन-यापनाय उद्यतौ दृश्येते येन वैवाहिकं जीवनं विच्छिन्नं भवति। सहैव निखिलः परिवारः छिन्न-भिन्नो भवति। सीतारामौ भारतीययुगलानां कृते आदर्शदम्पती रूपेणाऽनुकरणीयौ वर्तते।

## हिन्दी अनुवाद

भारतीय संस्कृति के संरक्षक आदिकवि महर्षि वाल्मीकि के द्वारा लोकमंगल की दृष्टि से विरचित आदिकाव्य रामायण संस्कृत के मूल तत्वों की विशद व्याख्या है। इस प्रसंग में महाकाव्य में वर्णित 'सीताराम' का सभी अवस्थाओं में रमणीय दाम्पत्यभाव युगयुगों तक लोक में अनुकरणीय एवं वरणीय है। विवाह के पश्चात् अयोध्या के राजमहल में अनेक सुख-सुविधाओं के बीच निवास करते हुए पति पत्नी राम एवं सीता परस्पर एक-दूसरे के पूरक प्रतीत होते हैं। श्रद्धा एवं विश्वास की भूमि पर विहार करते हुए सीता एवं राम की प्रीति दिनों-दिन बढ़ती हुई दिखाई देती है। कहा भी गया है- पिता जनक द्वारा श्री राम को समर्पित सीता उन्हें बहुत प्रिय थी। सीता के गुणों से एवं सौन्दर्य से राम का उनके प्रति प्रेम अधिकाधिक बढ़ रहा था। इसी प्रकार सीता के हृदय में भी राम अपने गुण एवं रूप से अधिक प्रीतिपात्र बनकर स्थित थे। वा.रा. 77/26/27

देवाङ्गना के समान सुन्दरी एवं लक्ष्मी के समान मङ्गलमूर्ति पतिप्राणा सीता अपने सहचर राम के हृदय में स्थित भावों को बिना कहे ही जानकर उनके मनोनुकूल आचरण से श्रीराम के हृदय को आकर्षित करती थी, सीताराम के मध्य कभी भी मतमतान्तर की स्थिति नहीं उत्पन्न होती थी - वा.रा. 1/17/28

अयोध्या के राजभवन में परस्पर एक-दूसरे से अनुकूल व्यवहार में प्रवृत्त सुख से अपने-अपने धर्म का पालन करते हुए आदर्श दम्पती श्रीराम एवं सीता सभी को प्रिय लगते थे। अपने दिव्य रूप गुण एवं कर्म से

सम्पन्न सीता-राम को पाकर राजभवन भी धन्य था। गुणों की खान सीता सदृशी पत्नी के साथ श्रीराम लक्ष्मी के साथ विष्णु की भाँति सुशोभित थे। वा.रा. 1/77/29

श्रद्धा एवं विश्वास के दृढ़ सूत्र से बद्ध सीता एवं राम का दाम्पत्य जीवन सुख अथवा दुःख किसी भी परिस्थिति में दिनोंदिन दृढ़ता को प्राप्त हो रहा था। विगत रात्रि पर्यन्त राजभवन में अपने सहचर श्रीराम के साथ सुखशय्या पर शयन करती हुई सीता प्रातःकाल उठकर विमाता कैकेयी के आदेश से राम के द्वारा बारम्बार मना किए जाने पर भी पति राम के द्वारा दृढ़तापूर्वक रोके जाने पर भी **'देवी सीता राम के स्थान पर राजा के पद पर अभिषिक्त होगी'** ऋषि वशिष्ठ के द्वारा प्रस्तुत इस भव्य प्रस्ताव को ठुकराती हुई पतिप्राणा अपने दृढ़ संकल्प से तनिक भी विचलित न होती हुई घोर वन में राम के साथ जाने के लिए उद्यत होकर कहने लगी- हे प्राणनाथ! मैं आपके साथ मृग, वानर एवं हाथियों से घिरे हुए वन में अवश्य चलूँगी ताकि आपके चरणों की सेवा करती हुई आपके अनुकूल आचरण करती हुई वन में पिता के भवन की भाँति सुख से निवास करूंगी। वा.रा. 2/27/22

सीता के दृढ़ आग्रह से किंकर्त्तव्य मूढ़ एवं विवश राम ने सीता और लक्ष्मण के साथ वन में प्रस्थान किया। किन्तु कोमलाङ्गी एवं सुखों में पली-बढ़ी सीता के लिए वन में प्राप्त होने वाले घोर कष्ट कहीं असहनीय न हों इस व्यथा से चिन्तित राम अपनी सहचरी सीता के सुख के लिए लक्ष्मण से कहते हैं- 'हे लक्ष्मण! सीता को सुख निद्रा के लिए रात्रि में हम दोनों भाइयों को आलस्य छोड़कर जागना होगा क्योंकि सीता का योगक्षेम हम दोनों के ही अधीन है। वा.रा. 2/53/3

वन में रावण के द्वारा अपहरण किए जाने पर सीता का अपने पति राम के प्रति दृढ़ विश्वास भारतीय नारी के उदात्त स्वरूप की भव्य झाँकी है। सीता के अनुसार इन्द्र की पत्नी शची का अपहरण करके सम्भव है कि कोई जीवित रह सके, किन्तु राम की पत्नी सीता को ले जाकर कोई भी कुशलपूर्वक नहीं रह सकता। वा.रा. 2/48/23

जिस प्रकार पतिव्रता सीता विषम परिस्थितियों में भी अपने पति राम के प्रति पूर्ण विश्वस्त है उसी प्रकार राम भी वन में सीता के बिना अकेले लक्ष्मण को देखकर असंयत एवं उद्विग्न दिखाई देते हैं। यहाँ तक कि वन में इधर-उधर सीता को खोजते हुए प्राण त्याग करने को उद्यत हो जाते हैं। उन्मत्त की भाँति अपनी सुध-बुध खोकर लता वृक्षादि से सीता के गन्तव्य के विषय में विविध प्रश्न पूछते हुए लक्ष्मण से कहते हैं- 'हे लक्ष्मण! यदि सीता जीवित होगी तभी मैं पुनः आश्रम में प्रवेश करूँगा और यदि वह मर गयी होगी तो मैं भी प्राणों का त्याग कर दूंगा। वा.रा. 3/58/9

इसी प्रसंग में वनवास में अपने साथ ले चलने की प्रार्थना करती हुई सीता के ये वचन ध्यान देने योग्य है, जहाँ सीता कह रही है- इस तरह वन में सैंकड़ों अथवा हजारों वर्षों तक भी आप के साथ रहने का सौभाग्य मिले तो मुझे कभी कष्ट का अनुभव नहीं होगा। आपके साथ के बिना तो मुझे स्वर्गलोक की प्राप्ति भी अभीष्ट नहीं है और भी हे राघव! आपके बिना तो यदि मुझे स्वर्गलोक का निवास मिले तो भी वह मेरे लिये रुचिकर नहीं होगी। वा.रा. 2/27/20-21

इस प्रकार वाल्मीकि रामायण में वर्णित सीता और राम का आदर्श दाम्पत्य सम्बन्ध युगोंयुगों तक भारतीय परिवारों के लिये अभ्युदय एवं निःश्रेयस के लिए प्रेरणीय है। आजकल पश्चिम की आँधी से भारतीय संस्कृति की जड़ें प्रकम्पित प्रतीत हो रही हैं, पति-पत्नी के मध्य श्रद्धा एवं विश्वास का बन्धन धीरे-धीरे शिथिल होता दिखाई दे रहा है, राई को पर्वत बनाकर कलह करते हुए पति-पत्नी स्वतन्त्र रूप से जीवन व्यतीत करने के लिए उद्यत हैं। जिससे वैवाहिक जीवन विच्छिन्न हो जाता है। साथ ही सम्पूर्ण परिवार भी छिन्न-भिन्न एवं पराया सा हो जाता है। सीता एवं राम भारतीय युगलों के लिए आदर्श दम्पती के रूप में अनुकरणीय हैं।

**- पूर्व-संस्कृतविभागाध्यक्षा,**
**लालबहादुर-शास्त्री कॉलेजः, जयपुरम्।**

आयुर्वेद-स्तम्भः

# निदाघशरदोर्नैव पूजितमार्द्रकम्

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**आयुर्वेदमाध्यमेन करणीये चिकित्साकर्मणि भिषग्, द्रव्याणि, उपस्थाता रोगी इति पादचतुष्टयम् ख्यापितम्। पादचतुष्टयेनानेनातुराणां विकारोपशान्तिर्भवति, किन्तु विकारव्युपशान्तये तु पादचतुष्टयस्य गुणवत्त्वमेव कारणं ज्ञेयम् । पादचतुष्टयेऽपि भिषजः प्राधान्यं भवति, तदनु भेषजं, चिकित्सायां प्रधानकारणभूतत्वात्; तदनु परिचारकः, भेषजप्रयोगस्य कल्कक्काथादिसाध्यस्य तदधीनत्वात्। यद्यप्यातुराधिकरणमारोग्यं पादैः सम्पाद्यते, स एव च वैद्यादीनामुपकार्यः, उपकार्यश्च प्रधानं भवति, तथाऽपीह व्याधिप्रशमे साध्ये यथा वैद्यादिपादत्रयस्य व्यापारो न तथाऽऽतुरस्येत्यप्राधान्यविवक्षया पश्चादुक्तः।**

आयुर्वेद के माध्यम से करने योग्य चिकित्सकर्म में चिकित्सक, द्रव्य, परिचारक एवं रोगी यह पादचतुष्टय कहा गया है। इस पादचतुष्टय से रोगियों के विकार का उपशमन होता है किंतु विकार का विशेष रूप से उपशमन करने में तो पादचतुष्टय की गुणवत्ता को ही कारण जानना चाहिए। पादचतुष्टय में भी वैद्य की प्रधानता होती है, उसके बाद चिकित्सा में प्रधान कारणभूत होने के कारण भेषज को कहा गया है, उसके बाद में परिचारक का स्थान है। भेषजप्रयोग की कल्क, क्राथ इत्यादि साध्य व्यवस्थाएं परिचारक के अधीन होने से (उसकी गणना की है)। यद्यपि आतुररूपी अधिकरण में ही अन्य जो तीन पाद हैं उनके द्वारा आरोग्य संपादित किया जाता है और वही वैद्य इत्यादि का उपकार्य (सहायता करने के लिए उपयुक्त) भी है और उपकार्य प्रधान होता है फिर भी यहां व्याधिप्रशमन में साध्य स्वरूप में जिस प्रकार से वैद्यादि तीन पादों का कार्य होता है वैसा आतुर का कोई सीधा कार्मुकत्व नहीं है इसलिए अप्राधान्य होने से उसे बाद में कहा गया है(अंत में कहा गया है)।

**यद्यपि रोगनिवारणक्रमे भिषजः प्राधान्यं निर्दिष्टं तर्ह्यपि भेषजं विना तु सः किमपि करणे समर्थो नास्ति, अत एव रोगनिवारणार्थं वारणार्थं वा सः श्रेष्ठानां तत्र योग्यानां द्रव्याणां चयनङ्करोति।**

यद्यपि रोगनिवारण के क्रम में वैद्य का प्राधान्य निर्दिष्ट किया गया है तो भी भेषज के विना तो वह कुछ भी करने में समर्थ नहीं होता है, इसलिए रोग निवारण के लिए अथवा रोग का वारण (बचाव) करने के लिए अर्थात् रोग हो ही नहीं ऐसा करने के लिए श्रेष्ठ और उस विकार को दूर करने में योग्य (समर्थ) द्रव्य का चयन करता है।

**शरीरन्तु खलु पञ्चभूतात्मकं द्रव्याण्यपि च पञ्चभूतात्मकानि, अत एवायुर्वेदीयचिकित्साया-मुपयुक्तानां द्रव्याणां चयनमावश्यकम्। आचार्यश्चरकःकथयति यत् 'सर्वं द्रव्यं**

**पाञ्चभौतिकमस्मिन्नर्थे'। 'अस्मिन्नर्थे' इत्यनेनाचार्यः संसूचयति यद् अस्मिन् प्रकरणे (आयुर्वेदे)। एतेषां द्रव्याणामाहाररूपे भेषजरूपे च प्रयोगो भवति। द्रव्यप्रयोगे तु वैशिष्ट्यमेतद्वर्तते यन्नहि सर्वाणि द्रव्याणि सर्वस्मिन् काले प्रयोक्तव्यानि।**

शरीर तो पञ्चभूतात्मक है और द्रव्य भी पञ्चभूतात्मक हैं, अतः आयुर्वेदीय चिकित्सा में उपयुक्त द्रव्यों का चयन आवश्यक होता है। आचार्य चरक कहते हैं कि सभी द्रव्य पाञ्चभौतिक हैं इस प्रकरण में। 'अस्मिन्नर्थे' इससे आचार्य कहते हैं कि इस प्रकरण में अर्थात् आयुर्वेद में। इन द्रव्यों का आहाररूप में और भेषज के रूप में प्रयोग होता है। द्रव्य के प्रयोग में तो यह वैशिष्ट्य है कि सभी द्रव्य सभी कालों में प्रयोग करने योग्य नहीं होते हैं।

**आयुर्वेदे भेषजद्रव्यस्याहारात्मकस्य च द्रव्यस्य प्रयोगो दोष-देश-काल-बल-शरीर-आहार-सात्म्य-सत्त्व-प्रकृतिवयसामवस्थान्तराणां सम्यगवलोकनं कृत्वैव करणीयोऽस्ति। भेषजस्यावस्थान्तराणि तु तरुणत्वं, वृद्धत्वम्, आर्द्रत्वं, शुष्कत्वं, द्रव्यान्तरसंयुक्तत्वं, स्वरसादिकल्पनायोगित्वमित्यादीनि भवन्ति, द्रव्यस्य रसवीर्यविपाकैः प्रभावैश्च तस्मिन् देहे दोषादौ तत्तत्कार्यकर्तृत्वं भवति, देशस्त्वानूप-जाङ्गलसाधारणप्रशस्तादिभेदभिन्नः; कालावस्थान्तराणि तु ऋतुभेदाः।**

आयुर्वेद में भेषज द्रव्य का और आहारस्वरूपक द्रव्य का प्रयोग दोष-देश-काल-बल-शरीर-आहार-सात्म्य-सत्त्व-प्रकृति एवं उम्र इन सब की अनेक प्रकार की इन अवस्थाओं का अच्छी प्रकार से अवलोकन करने के बाद ही करने योग्य होता है। भेषज की अनेक अवस्थाएं होती हैं जैसे- तरुणता (आमस्वरूप), वृद्धत्व (पका हुआ स्वरूप), आर्द्र द्रव्य अथवा शुष्क द्रव्य, दूसरे द्रव्यों से संयुक्त करके प्रयोग किया गया द्रव्य, स्वरस आदि कल्पना करने योग्य द्रव्य तथा द्रव्य का रस, वीर्य एवं विपाक से तथा प्रभाव से उस देह में और दोष इत्यादि में वह-वह कार्य कर्तृत्व होता है (उसमें शक्ति है या नहीं यह देखकर प्रयुक्त किया जाता है) देश तो आनूप, जाङ्गल और साधारण होता है इनमें भी श्रेष्ठ इत्यादि भेद से विभक्त किया जा सकता है। काल की अवस्थाएं तो ऋतु के भेद हैं (6 प्रकार की ऋतुएं हैं)।

**अत्रैकस्यैतादृग्विधस्य द्रव्यस्य विषये किञ्चिन्निवेदयामि यस्य प्रयोगो न सर्वर्तुषु निर्बाधरूपेण करणीयः। द्रव्यं ह्येतदार्द्रकम्, कोरोनाकाले परमोपयोग्यस्य द्रव्यस्य प्रयोगो वर्तमानकाले बहवो जनाः निर्बाधरूपेण निरन्तरं कुर्वन्ति। नह्येतदुचितम्। आर्द्रकस्य वर्णनप्रसङ्गे भावमिश्रः कथयति यत् -**

यहां पर एक इस तरह के द्रव्य के विषय में कुछ निवेदन कर रहा हूं जिसका प्रयोग सभी ऋतुओं में निर्बाध रूप से नहीं करना चाहिए। यह द्रव्य अदरक है। कोरोना काल में परमोपयोगी इस द्रव्य का प्रयोग वर्तमानकाल में बहुत से लोग निर्बाध रूप से निरंतर कर रहे हैं, यह उचित नहीं है। अदरक के वर्णन के प्रसङ्गमें भावमिश्र कहते हैं कि-

आर्द्रकं शृङ्गवेरं स्यात्कटुभद्रं तथार्द्रिका ।
आर्द्रिका भेदिनी गुर्वी तीक्ष्णोष्णा दीपनी मता।
कटुका मधुरा पाके रूक्षा वातकफापहा।
ये गुणाः कथिताः शुण्ठ्या-
स्तेऽपि सन्त्यार्द्रकेऽखिलाः।।४६।।
भोजनाग्रे सदा पथ्यं
लवणार्द्रकभक्षणम्।
अग्निसन्दीपनं रुच्यं
जिह्वाकण्ठविशोधनम्।।४७।।
कुष्ठपाण्ड्वामये कृच्छ्रे रक्तपित्ते व्रणे ज्वरे।
दाहे निदाघशरदोर्नैव पूजितमार्द्रकम्।।४८।।
(भावप्रकाशनिघण्टुः हरीतक्यादिवर्गः)

'आर्द्रकं, शृङ्गवेरं, कटुभद्रं तथा आर्द्रिका' ये इसके संस्कृत में नाम हैं। अदरक (मल का) भेदन करने वाली, गुरु, तीक्ष्ण, उष्ण होती है और दीपन करने वाली मानी गई है। यह कटुरस वाली है लेकिन पाक में मधुर है, रूक्ष है, वात एवं कफ को दूर करने वाली है, जो गुण सोंठ में कहे गए हैं वे सभी गुण अदरक में भी होते हैं। भोजन के प्रारम्भ में लवण और अदरक का सदा भक्षण करना पथ्य होता है, यह अग्नि को संदीपन करने वाली, रुचिकर होती है तथा जीभ और कंठ का विशोधन करने वाली है। कुष्ठरोग में, पांडुरोग में, कृच्छ्र रक्तपित्त में, व्रण में और ज्वर में तथा शरीर में दाह हो रहा हो तो उसमें इसका प्रयोग नहीं करना चाहिए। ग्रीष्म और शरद् ऋतु में अदरक के प्रयोग को श्रेष्ठ नहीं माना गया है।

**कफदोषक्षपणार्थं सर्वोत्कृष्टमेतद्द्रव्यम्, विशेषेण तु श्वासकासनिबर्हणम्। आर्द्रिका दीपनी प्रोक्ता। अत एव जनाः विविधेषु व्यञ्जनेषु युञ्जन्ति विशेषेण तु चायनामके पेये। येन केन प्रकारेण प्रयुक्ता ह्येषाऽऽर्द्रिका अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनमस्ति।। किन्तु कुष्ठपाण्ड्वामयाद्युपरि निर्दिष्टेषु विकारेष्वस्याः प्रयोगो न करणीयः। यद्यप्याचार्येण भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणमिति निर्दिष्टं किन्त्वग्रे निर्दिष्टं यद्- दाहे निदाघशरदोर्नैव पूजितमार्द्रकम्।**

**कफदोषकृतव्याध्यवस्थायामानूपे देशे श्वासे कासे च हितकारकमेतद्द्रव्यम् किन्तु निदाघे शरदि चास्य प्रयोगोऽवधानतया करणीयः।**

कफदोष को नष्ट करने के लिए यह द्रव्य सर्वोत्कृष्ट है, विशेष रूप से तो श्वास और कास को नष्ट करने वाला है। अदरक को अग्नि को दीपन करने वाली कहा गया है, इसलिए लोग विविध व्यंजनों में इसका प्रयोग करते है। विशेष रूप से तो चाय नामक पेय में इसका प्रयोग करते हैं। किसी भी प्रकार से प्रयुक्त की गई यह अदरक अग्निसंदीपन करती है, रुचिकर है, जीभ और कंठ का विशोधन करती है किंतु कुष्ठ, पाण्डुरोग इत्यादि जो ऊपर निर्दिष्ट किए गए हैं इन विकारों में इसका प्रयोग नहीं करना चाहिए। यद्यपि आचार्य ने भोजन के पहले लवण और अदरक का भक्षण सर्वदा ही पथ्य माना है लेकिन आगे निर्दिष्ट कर दिया है कि दाह में और ग्रीष्म काल में तथा शरद् ऋतु में अदरक के प्रयोग को श्रेष्ठ नहीं माना जाता है। कफदोष से उत्पन्न होने वाली व्याधि की अवस्था में, आनूपदेश में श्वास और कास में यह द्रव्य हितकारक है किंतु ग्रीष्मकाल में और शरद् में इसका प्रयोग सावधानी से ही करना चाहिए।

प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2024-26

*With best compliments from :*

Regd. Office & Works : HAMIRGARH
Distt. BHILWARA-311025 (Raj.)
Tel. : 01482-286102, 03, 05 & 06
E-mail : bhilwara@kanoria.org
Website : www.ainfrastructure.com
CIN : L25191RJ1980PLC002077
GST No.: 08AABCA7493D1ZO

**Kanoria Energy**
**& Infrastructure Limited**

(Formerly Known as A Infrastructure Limited)

MANUFACTURER OF MAZZA AC PIPES KIRTI BRAND

411, IIIrd Floor, Shalimar Complex, Church Road, JAIPUR-302001 (Raj.)
Ph. : 0141-4019691, 2370566 • E-mail : jaipur@kanoria.org

राष्ट्रीय विचारों के लिए पढ़ें

बात भारत की
पाञ्चजन्य
साप्ताहिक

Voice of the Nation
ORGANISER
Weekly



हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में उपलब्ध
- ई-पेपर की सुविधा



You can subscribe पाञ्चजन्य | ORGANISER weeklies online through our
Website : panchjanya.com, organiser.org

वार्षिक ग्राहक शुल्क | पाञ्चजन्य ₹1450 (साधारण डाक द्वारा) | ORGANISER ₹1450 (by ordinary post) | विदेशों में $80 (विदेशों में हवाई डाक द्वारा)

*रजिस्टर्ड डाक के लिए 1000 रुपए अतिरिक्त शुल्क

भारत प्रकाशन (दिल्ली) लिमिटेड
द एड्रेस, प्लॉट नं. 4बी, डिस्ट्रिक्ट सेन्टर, मयूर विहार फेज-1 एक्सटेंशन, दिल्ली-110091 • ई-मेल : advt@bpdl.in
विज्ञापन विभाग सम्पर्क सूत्र :- 708-9696-708, 814-3232-814

स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः प्रोफेसर बनवारीलालगौडः, प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाषः ०१४१-२३७१०१४

प्रतिष्ठायाम्,